इ.पु.४८६

श्रीकृष्णसूत्रप्रकाशिनी

ह.पु. ४८६

श्री कुपासुत्र प्रकाशिनी

श्रीः

श्रीकथासूत्रप्रकाशिनी ॥

श्रीमन्महाभारतान्तर्गत हरिवंशस्य अर्थावतरणिका
श्रीपाण्डेइत्युपनामकेन क्षमादेवशर्मणा
विरचिता
तत्सूनुना पद्मरत्नाकर शर्मणा संशोधिता

नेपाल.

पाशुपत यन्त्रालये मुद्रिता.

सम्वत् १९६८

प्रथम वार १०००

विज्ञापन

श्रीपर्वत्रयात्मकहरिवंशपुस्तकेषु ग्रन्थश्लोकादीनां यद्यः न्यूनाऽधिकत्वं नास्ति तथापि लिपिकरप्रमादादध येषुन्यूनाऽधिकत्वं दृश्यते यत्रच अवतरणिकार्थानां संगति र्नघटते तत्रच श्रीमद्भिर्विचारणीय मिति विज्ञप्तिः ॥ तथाच परोपकारेप्सूनां श्रीमतां प्राचीन हरिवंश पुस्तकेषु अवतरणि काश्लोकस्थापनेच्छा भवेत्तदा आमङ्गलाचरणात् सर्व एव श्लोकाःस्थापनीयाइति द्वितीया विज्ञप्तिः ॥ तथाच श्रीमद्भि र्मुद्राऽधिकारिभि र्हरिवंश पुस्तकेषु मुद्यमाणेषु आमङ्गलाचर णात् नृपादीनामपि सर्वएव श्लोकाःस्थापनीया इति तृती या विज्ञप्तिः ॥ तथाच परोपकारलक्षणानि भर्तृहरिणोक्तानि ॥ धन्यास्ते पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये सामा न्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेनये ॥ तेऽमीमानुषरा क्षसाः परहितंयैः स्वार्थतो हन्यते ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ १ ॥ इति ॥

विज्ञापन ॥

ग्रन्थ प्रयोजनम् ॥

श्रीकृष्णपरमात्मा को अरू अवतारको पनि चरित्र र ब्रह्माको उत्पत्ति देखि देवता ऋषि सूर्यवंशि राजादि सवै को उत्पत्ति चरित्रको कथास्मेत भयाको यो ग्रन्थको गुण य स्तोछ कि ठुलाठुला शास्त्रीलाइ पनि नवाह बाचदामा अ र्थ गर्नालाइ सुविस्ता हुनेर यो ग्रन्थ मात्रै हेरेपनि हरिवंश को कथा सवै बुझिने फेरी सिकारु पण्डित् लाइ पनि अर्थ भन्न अभ्यास गर्नालाइ बहुत फायदा दिने अरू अर्थ नबु झने अक्षर मात्रै जान्ने लाइ यो ग्रन्थ पाठ गर्नाले र सुन्ना ले हरिवंशको कथा भनेको र श्रीकृष्ण परमात्मा को नाम भने को पुण्यले यस लोकमा पापको प्रायश्चित्त भई परलो कमा स्वर्गमोक्ष मिल्ने यस्तो उत्तम ग्रन्थ लाइ कसैले हेला गरि बेकम्बा देखदछ भने सो देखने को बेसमुझ हो जस्तो संपूर्ण गुण भयाको जङ्गलमा राजाको सवारि हुँदाखानिको र सिकारको खोजि हुन्छ योगी ब्राह्मण हेरु जाँदा कन्द- मूल फलफूल को खोजि हुन्छ उँट जाँदा काँडाको र सुँगुर जाँदा बिष्टाको खोजिहुन्छ यस्तै रितले सवैको आफ्नो द र्जा माफिकको समुझ हुन्छ यसै कारण ले इनै ग्रन्थ कर्ता ले ग्रन्थ समाप्ति मा यस्तो श्लोक लेखेका छन्कि त्यस् श्लोकको यो आशयहो, अज्ञानी म लडका ले बनायाको ईश्वरको गु णानुवाद भयाको योग्रन्थमा भयाको गुणदोष सज्जनले बि- चार गरी भनी दिउन् यदि दुर्जन हरू उल्टा निन्दा गर्छन् भने मलाइकेहि दोषछैन यो तिनैको भूलहो इति, श्लोकोयं.

अज्ञेनयच्च शिशुना परिवीक्ष्यकृत्यं श्लाध्यंसतां रचितगौर
णानुवादैः ॥ सन्तोषदन्तु ननु दोषगुणौ विविच्य येदुर्जनाः
परिहसन्तु नमेऽत्रदोषः ॥ १ ॥ शुभम्

श्रीहरिवंशकी पुस्तक पुनरावृत्ति छापनेके समयमें गुणज्ञज
नलोक यह कथासूत्रप्रकाशिनीकोभी साथही रखके जरूर
छपावेंगें आगे छपेहुये पुस्तकोंपर और लेखोटके पुस्तकोंप
र भी इस्कारहनेका योग्यता होनेसे पृथक् छपाकर प्रकाश
किया जाताहै.

नं० ११-

श्रीगणेशाय नमः । नं० ५०४० / ४४८०

श्रीमद्विघ्नहरं गुहं दिनमणिं साम्बं शिवं केशवम् योगिज्ञानिगुरून्द्विजैश्च सह गाः सिद्धान्सुरान्भारतीम् ॥ नत्वा तत्प्रवदाम्यहं यदिह ते मां वाचयन्तिस्फुटं सद्भावादिपदार्थतः शिशुमतेर्दोषो न मे स्यात्क्वचित् ॥ १ ॥

सर्वाख्यायिकरूपोपि यो वै नाख्यायते क्वचित ॥ ब्रह्मसायुज्यगो ज्ञेयः प्रकृत्या जीवनोदकः ॥ २ ॥

शक्तिर्यश्चेन्द्रियार्थानां तेन सर्वात्मना हृदि ॥ तनोमि प्रेरितोऽहं तत्कथासूत्रप्रकाशिनीम् ॥ ३ ॥

स जयति नगेन्द्रराजो नृपस्य मम
चापि यो गुरुश्रेष्ठः ॥ यत्कृपयेशक-
थेव च मूकास्यान्मन्मुखाद्याति ४
महत्सु नाश्चर्यतरं गुणानां
क्षुद्रेषु दोषस्य न चित्रमस्ति ॥
मूर्खस्य यन्मे मुखतोऽभियाति
वाणी किलाश्चर्य्यतमं हि दैवी ५

अथ स्वदेशराजवर्णनम् ॥

तेजोविक्रमसम्पन्नः पृथिवीवीरविक्र
मः ॥ नेपालाऽधिपतिः पञ्चवर्षो यो
ऽभूत्स्वयं नृपः ॥ ६ ॥
दयासमुद्रः खलु भूमिपेन्द्रः साक्षा-
दुपेन्द्रोऽर्चितचन्द्रचूडः ॥ धर्मप्रता-
पोज्वलतस्सुरेन्द्रो दानादिभिस्तो-
षितभूसुरेन्द्रः ॥ ७ ॥

ब्रह्माण्डं प्रकृतीव या प्रसुषुवे सूनुंन-
रेशेश्वरं श्रीब्रह्मप्रकृतेरशेषकलयाजा
ताऽस्य माताध्रुवम् ॥ नो चेत्पब्रसु-
रेशतोषणकरी चैतादृशी स्यात्कथं
विद्याज्ञानविवेकनीतिनिपुणा बुद्धी-
न्द्रियात्माऽर्थदृक् ॥ ८ ॥

श्रीमत्त्रैलोक्यसाम्राज्यलक्ष्मी ना-
म्ना च कर्मभिः ॥ शचीव गुणसम्प-
न्ना महादेवी प्रकाशते ॥ ९ ॥

श्रीचन्द्रसंशेरनृपोऽतिविज्ञो
नृपत्वमंत्रित्वयुगांकयुक्तः ॥
द्वौ भ्रातरौ नीतिविदौ सहायौ
फले च भूस्वर्गमहत्वसिद्धेः ॥ १० ॥
भातीव चन्द्रो यशसा नरेन्द्रो
नीत्या सुरेन्द्रो जितभमिपेन्द्रः ॥

धर्मैर्मुनीन्द्रो वलतोऽप्यहीन्द्रः
साक्षात्क्षितीन्द्रोऽर्चितभालचन्द्रः
शीघ्रवेत्ता महाबुद्धिर्विवेकनिपुणोर्थ
दः ॥ बभूव सर्वविद्याविद्भमीरोपिर-
साऽधिकः ॥ १२ ॥
भातीव चन्द्रवद्देवी चन्द्रसंशेरवर्म-
णः ॥ जितश्रीस्तिसृभिः श्रीभिःसा
ध्वी मतिमताम्बरा ॥ १३ ॥
यस्यागुणादिकथने मम मौनमेति
वाणी स्वरूपमतिलक्षणविज्ञतादेः ॥
तद्वागिजता यदि वदेत्त्रपया न सातां
तद्भर्तुरेव धिषणा खलुवेत्तुमर्हा १४
चन्द्रसंशेरभूमीशो भीमसंशेरकोभु
वम् ॥ जितसंशेरको जित्वा वहन्तु
सुमहद्यशः ॥ १५ ॥

धीरसंशेरजाश्चासन्सुताः सर्वे महा-
गुणाः ॥ येषां गुणैर्हरिस्तुष्टस्तेषांना
मान्यकीर्तयम् ॥ १६ ॥
ईशसंचोदितः कुर्वे हरिवंशस्य चा-
ल्पधिः ॥ तुष्ट्यर्थं हरिभक्तानां क-
थासूत्रप्रकाशिनीम् ॥ १७ ॥

कविवंशानुवर्णनम् ।

कुलनिधिरभिधानतः प्रसिद्धः
किलविबुधार्च्चनदिष्टरामहृश्चा ॥
कवयाति वहुशःषडङ्गवेत्ता
पदनिचयं प्रपितामहोहियस्य १८
तस्यात्मजोऽभून्मणिरामनामा
यः सिद्धमन्त्रः खलु देवभक्त्या ॥

१. अस्य तारानिधिरिति प्रसिद्धं नामान्तरमप्यस्ति। यतः। अनेनैव स्वनिर्मित वृत्तसाराख्यग्रन्थसमाप्तौ ‘ सूत्रार्थदर्पणमथाह्निककर्मकाण्डं योन्तेकरोदथच भागवतस्य टीकाम् ॥ षट्शास्त्रविस्कुलनिधेस्तनयः कनीयान्तारानिधिर्नृपमुदेपिहि वृत्तसारम् ॥ १.॥ ’ इत्युक्तम्.

विद्याविदोऽन्यान्नृपतेः सभायां
जेताऽप्युदारोज्झितसर्वसङ्गः ॥१९॥
श्रीलालरत्नाकरनामधेयः
सभक्तिपूजो मणिरामसूनुः ॥
नेपालदेशाधिपपूज्यपाद-
स्तत्वार्थविच्छिक्षितराजपुत्रः २०
सुतास्त्रयस्तस्य गुणा इवासन्
रमादिदेवोव्रतयोगनिष्ठः ॥
उमादिदेवोऽधिगुणेषुविज्ञः
सोहंक्षमादेवशिशुःकनिष्ठः २१

कविमातृकुलानुवर्णनम् ।

मातामहोऽस्य नागेश इवनागेश्वरोऽ
भवत् ॥ यस्य पुत्रोऽद्वितीयोऽभूत्स्व-
गुणैरतिमानुषैः ॥ २२ ॥
नेपालराजमुकुटोत्तमसङ्गतैर्यो

मण्युत्तमैः सुपरिपूजितपादपद्मः ॥
धर्माधिकारगुरुराजबुधाधिराजो
नाम्नाऽपियोविजयराजइति प्रसिद्धः ॥
सूनू द्वौ ननु सुकृताधिकारिणोऽस्य
जातौ वै तदवरजो द्विजाद्रिराजः ॥
तत्सूनुः कुवलयराजनामधेयो
ज्ञानीयोगुरुगुणधर्मतोऽग्रगण्यः २४
नगेन्द्र इव राजते विजयराजपूर्वा-
त्मजः षडङ्गविदमत्सरो गुरुनगेन्द्र
राजाऽभिधः ॥ सुधाप्लुतहृदार्तिहृ-
द्व्यसनदुःखितानां नृणां यतो गुरु-
मुखादियं किमुसरस्वती निःसृता: २५
तस्यात्मजौ द्वावधिराजपूज्यौ
श्रीलोकराजस्त्वथ तर्कराजः ॥

गुणैः प्रकाशीकृतकीर्तिराशि-
र्ज्येष्ठोऽभवत्तस्य सुतत्रयञ्च ॥२६॥
हेरम्बराड्डूरराज्ञो हेमराजश्चमध्य-
मः ॥ षट्शास्त्रविद्भूद्धीरो विश्वरा-
जःकनिष्ठकः ॥ २७ ॥
हरिवंशाऽऽख्यवृक्षस्य पुष्पस्त्रकृशा
ङ्गिणो मुदे ॥ क्षमादेवेनाऽर्भकाणां
कथाबोधाय बध्यते ॥ २८ ॥
पञ्चपञ्चाशदध्यायै र्हरिवंशेऽत्र वर्ण्य-
ते ॥ आदिसर्गात्समारभ्य सर्गःकृ-
ष्णोद्भवाऽवधि ॥ २९ ॥

अथावतरणिकारम्भः ।

तत्राऽदौ प्रथमेध्याये हिरण्याण्डोद्भ-
वो विधिः ॥ मरीचिसनकादीनां रु
द्राणां चोच्यतेजनिः ॥ ३० ॥ १ ॥

---

१ अध्यायाङ्कः

द्वितीये वर्ण्यतेवंशो दक्षान्तश्चामनोः
शुभः ॥ यस्मिन्प्राचीनबर्हिश्च जा-
ताः पूरुपृथुध्रुवाः ॥ ३१ ॥ २ ॥

तृतीये वर्ण्यते वंशो दक्षपुत्रीसमुद्भ-
वः ॥ धर्मकश्यपजैर्यत्र त्रैलोक्यम-
भिपूरितम् ॥ ३२ ॥ ३ ॥

चतुर्थे ब्रह्मणा सर्वेऽधिकारेषु नियो-
जिताः ॥ चन्द्राद्या वर्ण्यते राज्ञःक-
थारम्भः पृथोरनु ॥ ३३ ॥ ४ ॥

पञ्चमे मुनिभिश्चोक्तं वेनस्य मथि-
तात्करात् ॥ जातः पृथुस्तुतिस्तस्य
प्रजार्थे भाषणं भुवा ॥ ३४ ॥ ५ ॥

षष्ठे तु पृथुना सर्वे गोरूपा सान्त्व
तां क्षमाम् ॥ अभीप्सितानि दुदुहु-
र्वत्सपात्रादिभेदतः ॥ ३५ ॥ ६ ॥

सप्तमेऽनागतातीता मनवस्तत्सुता-
दयः ॥ सप्तर्षयो देवताश्च वर्ण्यन्ते
ऽत्र पृथक् पृथक् ॥ ३६ ॥ ७ ॥
अष्टमे दिनमानादिर्मनूनां ब्रह्मण-
स्तथा ॥ कालो मनुष्यदेवानां युग
मानं च वर्ण्यते ॥ ३७ ॥ ८ ॥
नवमे जज्ञिरे सूर्याद्यमौ वैवस्वतस्त्र
यः ॥ संज्ञायां शनिसावर्णौ छाया
गर्भोद्भवावुभौ ॥ ३८ ॥ ९ ॥
दशमे वर्ण्यते वंशो वैवस्वतसमुद्भ-
वः ॥ सोमसूर्य्याऽऽख्यया भिन्नोद्वि
धा तच्चरितं महत् ॥ ३९ ॥ १० ॥
अथैकादश इक्ष्वाको रन्ववायो नि-
रूप्यते ॥ आधुन्धुमारकस्तेन राज्ञा
धुन्धोर्वधस्तथा ॥ ४० ॥ ११ ॥

द्वादशे चाद्दढाश्वस्तु वंशः सत्त्यव्रतावधि ॥ वर्ण्यते मञ्जुलो यस्मिन्मुचुकुन्दादयोऽभवन् ॥ ४१ ॥ १२ ॥
त्रयोदशे त्रिशंकुर्वै विश्वामित्रतपोबलात् ॥ सदेहः स्वर्गतश्चोक्तो वंशश्चासगरोद्भवः ॥ ४२ ॥ १३ ॥
चतुर्दशेऽत्र वर्ण्यन्ते सगरस्य महात्मनः ॥ विस्तराज्जन्म कर्माणि यज्ञादीन्यपि वै क्रमात् ॥ ४३ ॥ १४ ॥
अथ पञ्चदशे वंशः सगरात् पुण्यवर्द्धनः ॥ बृहद्बलान्तको यास्मिन् वर्ण्यते रामसंभवः ॥ ४४ ॥ १५ ॥

अथातः पितृकल्पारम्भः ॥

षोडशे वर्ण्यते गुह्यं पितृणां लक्षणोत्तमम् ॥ संभाषणेन सुधियो दैवा

च्छन्तनुभीष्मयोः ॥ ४५ ॥ १६ ॥
अथ सप्तदशे देवैः प्रजानां तृप्तिहे-
तवे ॥ प्रायश्चित्ताऽपदेशेन पितृयागः
प्रकाश्यते ॥ ४६ ॥ १७ ॥
अष्टादशे तु पितरो ऽमूर्त्तमूर्त्ता नि-
रूपिताः ॥ देवनॄणां त्रिचतुरा स्त-
त्सुताश्चाऽन्वयाः पृथक् । ४७ । १८
ऊनविंशे निरूप्यं हि पश्चात् पितृ
क्रियाफलम् ॥ संक्षेपा त्पूर्वमेवेह दै
वप्राप्तं प्रकाश्यते ॥ ४८ ॥ १९ ॥
विंशे जन्मांतरगतः पितृवंशो निग
द्यते ॥ भीष्मा द्योग्रायुधवधो मनो
ज्ञा पक्षिणी कथा ॥ ४९ ॥ २० ॥
एकविंशे भरद्वाजकौशिकव्याधतो
मृगात् ॥ चक्रा द्धंसा च्च पितरः स

तै तेभ्योऽभवन्क्रमात् ॥ ५० ॥ २१॥
द्वाविंशे चात्र पितर स्त्रयो भोगैषि-
णो भवन् ॥ चतुर्भिः कृपया न्यैश्च
तन्मुक्त्यै समयः कृतः ॥ ५१ ॥२२॥
त्रयोविंशे नृपामात्यगुरवश्चाऽभवंस्त्र
यः ॥ चत्वारो ज्ञानिनो विप्राःश्लोकौ
कृत्वा दिवं गताः ॥ ५२ ॥ २३ ॥
चतुर्विंशे चतुर्भिस्तैः श्लोकौ श्रुत्वा
कृतौ त्रयः ॥ नृपोऽमात्यगुरू ज्ञानंल
ब्ध्वा मुक्ता दिवं ययुः ॥ ५३ ॥ २४॥

पितृकल्पावसानमिदम् ॥

पञ्चविंशे विधोर्वंशः कृष्णजन्मप्रसंग
तः ॥ वर्ण्यते सोमजन्मादि हृता ता
रा बुधोद्भवः ॥ ५४ ॥ २५ ॥
षड्विंशे वर्ण्यते जातो बुधा त्पुरूर

च्छन्तनुभीष्मयोः ॥ ४५ ॥ १६ ॥
अथ सप्तदशे देवैः प्रजानां तृप्तिहे-
तवे ॥ प्रायश्चित्ताऽपदेशेन पितृयागः
प्रकाश्यते ॥ ४६ ॥ १७ ॥
अष्टादशे तु पितरो ऽमूर्त्तमूर्त्ता नि-
रूपिताः ॥ देवनॄणां त्रिचतुरा स्त-
त्सुताश्चाऽन्वयाः पृथक् । ४७ । १८
ऊनविंशे निरूप्यं हि पश्चात् पितृ
क्रियाफलम् ॥ संक्षेपा त्पूर्वमेवेह दै
वप्राप्तं प्रकाश्यते ॥ ४८ ॥ १९ ॥
विंशे जन्मांतरगतः पितृवंशो निग
द्यते ॥ भीष्मा च्चोग्रायुधवधो मनो
ज्ञा पाक्षिणी कथा ॥ ४९ ॥ २० ॥
एकविंशे भरद्वाजकौशिकव्याधतो
मृगात् ॥ चक्रा द्धंसा च्च पितरः स

स्तै तेभ्योऽभवन्क्रमात् ॥ ५० ॥ २१॥
द्वाविंशे चात्र पितर स्त्रयो भोगैषि-
णो भवन् ॥ चतुर्भिः कृपया न्यैश्च
तन्मुक्त्यै समयः कृतः ॥ ५१ ॥२२॥
त्रयोविंशे नृपामात्यगुरवश्चाऽभवंस्त्र
यः ॥ चत्वारो ज्ञानिनो विप्राःश्लोकौ
कृत्वा दिवं गताः ॥ ५२ ॥ २३ ॥
चतुर्विंशे चतुर्भिस्तैः श्लोकौ श्रुत्वा
कृतौ त्रयः ॥ नृपोऽमात्यगुरू ज्ञानंल
ब्ध्वा मुक्ता दिवं ययुः ॥ ५३ ॥ २४ ॥

पितृकल्पावसानमिदम् ॥

पञ्चविंशे विधोर्वंशःकृष्णजन्मप्रसंग
तः ॥ वर्ण्यते सोमजन्मादि र्हृता ता
रा बुधोद्भवः ॥ ५४ ॥ २५ ॥
षड्विंशे वर्ण्यते जातो बुधा त्पूरु

वा नृपः ॥ गुणकर्मातिसौन्दर्य्या-
द्यस्यासी दुर्वशी वधूः ॥ ५५ ॥ २६ ॥
सप्ताविंशेऽन्वय स्त्वैलपुत्रस्याऽमाव
सोः शुभः ॥ वर्ण्यते देवरातान्तोय
त्राऽसन्कौशिकादयः ॥ ५६ ॥ २७ ॥
अष्टाविंशे सुतस्यायोःसाश्चर्यं चो
च्यते रजेः ॥ देवेश्वरत्वमहिमा श-
क्राद्धै तत्सुतक्षयः ॥ ५७ ॥ २८ ॥
ऊनात्रिंशेऽन्वयः क्षत्रवृद्धस्याऽनेनस
स्तथा ॥ वर्ण्यते काशिमहिमा क्षत्र
वृद्धान्वयान्तरे ॥ ५८ ॥ २९ ॥
त्रिंशे पूरुरवः पौत्रनहुषस्यो च्यते
न्वयः ॥ पुण्यं ययातिमाहात्म्यं च
रित्रं तत्सुताद्भवः ॥ ५९ ॥ ३० ॥
एकात्रिंशेऽत्रधर्मिष्ठः पूरोर्वंशोऽभिव

र्ण्यते ॥ वृषान्तःसंभवा यस्मिन् शि-
बिवङ्गनृगादयः ॥ ६० ॥ ३१ ॥
द्वात्रिंशे तुर्वसुद्रुह्युपूर्वनूनां जगौ कु-
लम् ॥ दुष्यन्तबभ्रुद्रुहपाण्डवाश्चो
द्भवायतः ॥ ६१ ॥ ३२ ॥
त्रयस्त्रिंशे यदोः सूनोः सहस्रदस्य व
र्ण्यते ॥ वृषणान्तोऽन्वयो यस्मि-
न्कार्तवीर्य्यार्जुनोऽभवत् ।६२।३३।
चतुस्त्रिंशे यदुसुतक्रोष्टोरन्वयविस्तरः
॥ वर्ण्यते वसुदेवान्तो जाता यत्र म-
हौजसः ॥ ६३ ॥ ३४ ॥
पञ्चत्रिंशे महावंशो वसुदेवस्य गद्य-
ते ॥ बहुभार्य्यस्य यत्राऽऽसन्कृष्ण-
रामगदादयः ॥ ६४ ॥ ३५ ॥
षड्त्रिंशेऽपरपुत्रस्य क्रौष्टो वै वृजि

नीवतः ॥ ईर्यते सात्वतान्तोऽत्र वं-
शो ज्यामघसंभवः ॥ ६५ ॥ ३५ ॥
सप्तत्रिंशे त्वऽभिजनः क्रोष्टो रासा-
त्वतोऽभवत् ॥ देवक्यन्तश्चकंसान्तः
सुयशाः पुण्यवर्द्धनः ॥ ६६ ॥ ३७ ॥
अष्टत्रिंशेबहुविधःक्रोष्टोरेवाऽन्वयःपृथ
क् ॥ ईर्य्यते सत्यभामाप्तिः स्यमन्ता
स्यमणेःकथा ॥ ६७ ॥ ३८ ॥
चत्वारिंशे तुचैकोने शत्राजिच्छत-
धन्वना ॥ मणिहेतो र्हतःसोपि हरि
णाप्ति स्ततोमणेः ॥ ६८ ॥ ३९ ॥
चत्वारिंशे नृपोविष्णो र्माहात्म्यं व
र्णयन्मुनिम् ॥ पप्रच्छ कारणं श्रोतु
मवतारस्य भूतले ॥ ६९ ॥ ४० ॥
चत्वारिंशेऽधिकैकेऽस्मिन् संक्षेपात्का

र्यंजाःपृथक् ॥ विराड्वामनकृष्णा
ख्याऽऽवतारा वर्णिता हरेः ॥७०॥४१॥
द्विचत्वारिंशके युद्धे दयालु स्तारका
मये ॥ पराजितेषु देवेषु दैत्यैः प्रा-
दुरभूद्धरिः ॥ ७१ ॥ ४२ ॥
त्रिचत्वारिंशके श्रुत्वा प्रादुर्भावं म-
हाप्रभोः ॥ दानवैर्वं वरूथिन्याः स-
ज्जीकरणमुच्यते ॥ ७२ ॥ ४३ ॥
दृष्ट्वा सुरा श्चतुश्चत्वारिंशे दैत्योद्यमं
पुनः ॥ भवन्ति सज्जिताः शस्त्रैः पा-
शीन्द्राग्नियमादयः ॥ ७३ ॥ ४४ ॥
गीर्वाणराक्षसाः पञ्चचत्वारिंशे रणे-
गताः ॥ मायौर्वी दैत्यसृष्टाऽभूत्प्रस-
ङ्गा दौर्वसंभवः ॥ ७४ ॥ ४५ ॥
षट्चत्वारिंशे औवीं सा माया पाशी-

न्दुनाशिता ॥ पार्वती मयसृष्टाऽन्या मरुत्पावकनाशिता ॥ ७५ ॥ ४६ ॥
कालनेमी सुरान्सप्तचत्वारिंशे गतो मृधे ॥ स्थानभ्रष्टान् स्ववशगाँश्च-कार तरसा जयी ॥ ७६ ॥ ४७ ॥
कालनेमिनमालोक्याऽष्टचत्वारिंश-के रणे ॥ हत्वेन्द्राय दिवं दत्वा ब्रह्म लोकं ययौ हरिः ॥ ७७ ॥ ४८ ॥
पञ्चाशत्तम एकोने प्राप्ते विष्णौ महर्षयः ॥ सत्यलोकेऽध्वरं चक्रुस्तद्हते नाऽभवत्पुरा ॥ ७८ ॥ ४९ ॥
पञ्चाशत्तम एकाब्धौ गत्वा सुप्तं हरिं विधिः ॥ भूभारनाशनार्थाय सर्षिदेवो व्यबोधयत् ॥ ७९ ॥ ॥ ५० ॥
स्तुतिभिरेकपञ्चाशत्तमे तैर्बोधितोवि

भुः ॥ विज्ञापितश्च विधिना पृथ्वी
भारापनुत्तये ॥ ८० ॥ ५१ ॥
द्विपञ्चाशत्तमे गत्वा सुराःसविधिवि
ष्णवः ॥ स्थिता मेरोः सभायां भूस्ते-
षु दुःखं न्यवेदयत् ॥ ८१ ॥ ५२ ॥
त्रिपञ्चाशत्तमे क्षोण्या विधि र्भारा
पनुत्तये ॥ देवानंशाऽवतारेषु पृथक्-
सर्वानयोजयत् ॥ ८२ ॥ ५३ ॥
नारदोऽगाच्चतुः पञ्चाशत्तमे मेरु-
सद्मनि ॥ कृष्णाऽवतार मुद्दिश्य का
लनेमिजनुर्जगौ ॥ ८६ ॥ ५४ ॥
निर्दिष्टःपञ्चपञ्चाशत्तमे तु विधि-
नाभुवि ॥ शार्ङ्गिणो जन्मकर्मादिर्व
सुदेवगृहादिषु ॥ ८४ ॥ ५५ ॥
कुसुमस्रक् कृते विष्णोर्हरिवंशाख्य

शाखिनः ॥ पुरा ग्रन्थितुमारब्धा सा द्य पूर्णार्पिता विभौ ॥ ८५ ॥ ५६ ॥

इतिश्री हरिवंशस्य हरिवंशाख्य वृक्षरूपिं प्रथम पर्वणः पुष्पस्रग्रूपा कथासूत्रप्रकाशिनी अवतरणिका समाप्ता ॥

अथातोविष्णुपर्व प्रारम्भः ॥

नत्वा गुरुगणेशादीन् शम्भुं श्रीशं सरस्वतीम् ॥ विष्णवाख्यपर्वणःस्वल्पं कथासूत्रं प्रकाश्यते ॥ १ ॥ १ ॥

तुलसीतरुरूपस्य पर्वणः पत्रमुत्तमम् ॥ विष्णोश्चरणपद्मेषु क्षमादेवेन चार्प्यते ॥ २ ॥ १ ॥

ऊनात्रिंशोत्तरेणेह स्वध्यायायानां शते नवै ॥ कृष्णलीला समाख्याता या मनोमलहारिणी ॥ ३ ॥ १ ॥

तत्रादौ कंसमभ्येत्य नारदःकलहप्रि
यः ॥ देवसंमतिमाचख्यौ सोपिदेव
ऽकरोद्रुषम् ॥ ४ ॥ १ ॥
पुरा देवकृतं गुह्यं नारदेन प्रकाशि-
तम् ॥ द्वितीये तदुपायार्थं निद्राविष्णु
समागमः ॥ ५ ॥ २ ॥
कंससंमोहनार्थं तां निद्रामादिश्य-
योगिनीम् ॥ तस्या भाविष्यत्पूजादी
न्प्रातिजज्ञे तथा हरिः ॥ ६ ॥ २ ॥
तृतीये तु मनुष्याणां सिद्धिदा स्तु-
तिरुच्यते ॥ कृता त्वार्यास्तवाख्या-
या निद्रायाः विष्णुना पुरा ॥ ७ ॥ ३ ॥
चतुर्थे त्वऽवधीत्कंसः षड्गर्भान्सह-
दारिकान् ॥ देवकीसम्भवान्देव्या
समाकृष्टस्तु सप्तमः ॥ ८ ॥ ४ ॥

रोहिण्यामथ कृष्णस्य देवक्या गर्भ
तो जनिः ॥ गोकुले गमनं कंसे दा-
रिकावाक्यमुच्यते ॥ ९ ॥ ४ ॥

पञ्चमे पुत्रयोरर्थे श्रीनन्दवसुदेव-
योः ॥ संवादो वर्ण्यते प्रीतियुक्तयो
रक्षणात्मकः ॥ १० ॥ ५ ॥

षष्ठेऽधस्तात्प्रसुप्तोऽसौ पादावुत्क्षि-
प्य बालकः ॥ शकटं नाशयामास-
स्तनार्थी सर्वदो हरिः ॥ ११ ॥ ६ ॥

सप्तमे गोकुलं गत्वा पूतना सगरं स्त
नम् ॥ दत्वा कृष्णाय सा प्राप सद्गा
त्स्वर्गं सुदुर्लभम् ॥ १२ ॥ ७ ॥

अष्टमे दामसंबद्धः कृष्णः कर्षन्नुलू-
खलम् ॥ यमलार्जुनयोर्मध्यं गत्वा
भग्नौ चकार तौ ॥ १३ ॥ ८ ॥

नवमे गमनेच्छातो रम्ये वृन्दावने
हरिः ॥ वृका नुत्पादयामास स्वगा-
त्रेभ्यो भयंकरान् ॥ १४ ॥ ९ ॥
दशमे यत्कृते नूनं वृकोत्पत्तिः पुरो
दिता ॥ तद्गच्छन्त्यऽद्य ते वृन्दावनं
गोपाःसगोधनाः ॥ १५ ॥१० ॥
एकादशे प्रलम्बघ्नः शोभनांप्रावृषः
श्रियम् ॥ कृष्णं प्रोवाच संवीक्ष्य व
र्णयन्वार्षिकंगुणम् ॥ १६ ॥ ११ ॥
द्वादशे स्थूलभाण्डीरवटस्यापि च व
र्णनम् ॥ गोविन्दनयनाह्लादि कलि
न्ददुहितुस्तथा ॥ १७ ॥ १२ ॥
दमने कालियाहेश्च प्राणिनां सुख-
हेतवे ॥ कृष्णस्य समभूदिच्छा स-
विस्तरमिहोच्यते ॥ १८ ॥ १२ ॥

त्रयोदशे तु कृष्णेन कालियो यमुना
ह्रदात् ॥ दान्तश्चोद्वासितः सोऽपि द्वी
पं रमणकं ययौ ॥ १९ ॥ १३ ॥
ततश्चतुर्दशे तालवनं गत्वा सबान्ध
वम् ॥ सह तालैर्हलिश्चीशौ पातया
मासतुः खरम् ॥ २० ॥ १४ ॥
नीतः पञ्चदशे रामः प्रलम्बेन रहोव-
ने ॥ मुष्ट्या जघान तं शिर्ष्णि स
च देवादिभिस्तुतः ॥ २१ ॥ १५ ॥
षोडशे तु महेन्द्रस्य मखसंभरणोद्य
तान् ॥ कृष्णो गोपानपृच्छत्ताँस्ते
चेन्द्रमखमब्रुवन् ॥ २२ ॥ १६ ॥
कृष्णः सप्तदशे चेन्द्रमखं व्यावर्त्य हे
तुभिः ॥ गोवर्द्धनोत्सवार्थं तान्संभा
रैस्तैरचोदयत् ॥ २३ ॥ १७ ॥

हरिणाष्टादशे चेन्द्रमदभङ्गाय चोदिताः ॥ गोवर्द्धनोत्सवं यज्ञं गोपाश्चक्रुरसंशयाः ॥ २४ ॥ १८ ॥

ऊनविंशे मघवति व्रजनाशाय वर्षति ॥ गोवर्द्धनगिरिं धृत्वाऽरक्षत्कृष्णो मुदा व्रजम् ॥ २५ ॥ १९ ॥

विंशे गतमदश्चेन्द्रो भुवि गत्वा प्रणम्य तम् ॥ नाम्नाऽभिषिच्य गोविन्दं संभाष्याऽगाद्दिवं पुनः ॥ २६ ॥ २० ॥

एकविंशे तु गोपीभिः कृष्णो योगेश्वरेश्वरः ॥ मुदा वृन्दावने रात्रौ रेमे विबुधवन्दितः ॥ २७ ॥ २१ ॥

द्वाविंशेऽभयदः कृष्णो वृषवेषधराऽसुरम् ॥ अरिष्टं सञ्जघानेति वर्ण्यते भक्तवत्सलः ॥ २८ ॥ २२ ॥

त्रयोविंशे च कंसेन मन्त्रिभिर्मन्त्रणं कृतम् ॥ कृष्णरामौ समानेतु मक्रूर प्रेषणं व्रजे ॥ २९ ॥ २३ ॥

अन्धकेन चतुर्विंशेकंस शासनमुच्यते ॥ वसुदेवयुतो गत्वा कृष्णं नत्वेहचानय ॥ ३० ॥ २४ ॥

पञ्चविंशे तु कंसेन प्रेषितो हयरूप-धृक् ॥ केशी कृष्णेन संसक्तो व्यसुर्भूमौ निपातितः ॥ ३१ ॥ २५ ॥

केशिप्राणेषु षड्विंशे गतेष्वह्नि निशामुखे ॥ अक्रूरागमनं नन्दगृहे समु-पवर्ण्यते ॥ ३२ ॥ २६ ॥

सप्तविंशे तु मथुरां पुरीं गन्तु विनिर्ययुः ॥ कृष्णाक्रूरबला नन्दसाहिता व्रजवासिनः ॥ ३३ ॥ २७ ॥

साऽक्रूरौ केशवबलौ स्यन्दनेनैव ज-
ग्मतुः॥ अन्ये गोपास्तु शकटैर्जग्मु-
रध्वानमुच्यते ॥ ३४ २७ ॥
स्नातुं गतेन कालिन्द्या मक्रूरेण मुदा
जले ॥ दर्शनं कृष्णबलयो र्विष्णुना
गेन्द्ररूपिणोः ॥ ३५ २७ ॥
अष्टाविंशे तु मथुरां प्रविश्य रजकं
हरिः॥ हत्वा सुदामनाम्नेऽदान्माला
काराय वै वरम् ॥ ३६ ॥ २८ ॥
त्रिवक्रां रुचिरां कृत्वा कुब्जां च स-
बलो हरिः ॥ कंसस्य धनुषो भङ्गं वि
धाय वसतिं ययौ ॥ ३७ ॥ २८ ॥
ऊनत्रिंशे महामात्रचाणूराद्यैः सुम
न्त्रणम् ॥ कंसस्य वर्ण्यते तत्रोत्पत्तेः
स्वस्याऽनुभाषणम् ॥ ३८ ॥ २९ ॥

त्रिंशे राजगृहं गत्वा कृष्णोऽम्बष्ठप्र-
चोदितम् ॥ हत्वा कूटं गजं द्वारि रङ्गं
गत इतीर्य्यते ॥ ३९ ॥ ३०

एकत्रिंशे तु मल्लानां कंसस्य च व-
धस्तथा ॥ वर्ण्यते कृष्णरामाभ्यां पि
त्रोःपादाभिवादनम् ॥ ४० ॥ ३१॥

द्वात्रिंशे तु व्यसुं दृष्ट्वा कंसं कृष्णेन
पातितम् ॥ विलप्य रुरुदुस्तस्य रम
ण्यो दुःखिता भृशम् ॥ ४१ ॥ ३२ ॥

वासुदेवस्त्रयत्रिंशे चोग्रसेनाऽभिषेच
नम् ॥ कारयामास कंसस्य कर्म चो
त्तरमीर्य्यते ॥ ४२ ॥ ३३ ॥

चतुस्त्रिंशे तु कृष्णेन गुरोर्विद्याप्रधार
णम्॥वधःपञ्चजनस्यापि पाञ्चजन्य
परिग्रहः ॥ ४३ ॥ ३४ ॥

यमं जित्वा गुरोः पुत्रानयनं गुरुस-
न्निधौ ॥ मथुरागमनं पश्चात्सवि-
स्तरमिहोच्यते ॥ ४४ ॥ ३४ ॥

पञ्चत्रिंशे जरासन्धःकृष्णस्य श्रुतदूष
णः ॥ युद्धार्थी मथुरामेत्य रुरोध स-
बलः क्रुधा ॥ ४५ ॥ ३५ ॥

षड्त्रिंशे केशवबलौ मथुरायाबहिर्ग
तौ ॥ जरासन्धेन संसक्तौ युद्धायेति
निरूप्यते ॥ ४६ ॥ ३६ ॥

सप्तत्रिंशे जरासन्धो यदुभिर्बहुधा
जितः ॥ गतो युद्धे परावृत्य पुनःपु
नरितीर्य्यते ॥ ४७ ॥ ३७ ॥

अष्टत्रिंशे यदुपतेः सभायां मन्त्रणे
स्थितान् ॥ आश्रावयद्विकद्रुस्तान् य
दुवंशप्रविस्तरम् ॥ ४८ ॥ ३८ ॥

विकद्गुणोनचत्वारिंशके वंशोनुवर्ण्य
ते ॥ यदोस्तु विक्रमप्रायो वसुदेवो
द्भवाऽवधिः ॥ ४९ ॥ ३९ ॥

चत्वारिंशे जनक्षेममिच्छन्तौ रामके
शवौ ॥ विनिः सृत्य जरासन्धभया
दिव पलायितौ ॥ ५० ॥ ४० ॥

वेणातीरगतंगत्वा वटं भार्गवसङ्गतौ।
तेन संशिक्षितौ कार्य्यं सविस्तरमि-
तीर्य्यते ॥ ५१ ॥ ४० ॥

गोमन्तारोहणं चैकचत्वारिंशे तदा
द्वयोः ॥ वर्ण्यते कृष्णबलयोर्जामद-
ग्न्याविसर्जनम् ॥ ५२ ॥ ४१ ॥

द्विचत्वारिंशकेऽद्रौ तौ पूर्वाभूषण-
भूषितौ ॥ संभूतौ वर्ण्यते तत्र जरा-
सन्धस्य चागमः ॥ ५३ ॥ ४२ ॥

त्रिचत्वारिंशके दाहो गोमन्तस्य नृ
पैः कृतः ॥ कृष्णरामौ समुत्पत्य सै-
न्यमध्येऽभिजग्मतुः ॥ ५४ ॥ ४३ ॥
कृष्णस्य च चतुश्चत्वारिंशकेऽनु व-
लस्यच ॥ पुराणा ऽऽयुधसंप्राप्ति र्ज-
रासन्धपराजयः ॥ ५५ ॥ ४४ ॥
तयोश्च चेदिराजस्य प्रीतिकारी स-
मागमः॥ करवीरपुरे पश्चाद्गमनं चाऽ
त्र वर्ण्यते ॥ ५६ ॥ ४४ ॥
शृगालः पञ्चचत्वारिंशके व्यापादि-
तो रणे ॥ तत्सुतःस्थापितो राज्ये ह-
रिणा करवीरके ॥ ५७ ॥ ४५ ॥
षड्चत्वारिंशके स्वीयां करवीरपुरा-
पुरीम् ॥ गतौ विजयिनावेता वुच्यते
वलकेशवौ ॥ ५८ ॥ ४६ ॥

वत्सस्य सप्तचत्वारिंशके तु गमनं व्र-
जे ॥ यमुनाकर्षणं चोक्तं मथुरागम
नं पुनः ॥ ५९ ॥ ४७ ॥
विदर्भे चाष्टचत्वारिंशके भैष्मी स्व-
यंवरे ॥ त्वरया सबलः कृष्णो विवा
हेच्छुःसमाययौ ॥ ६० ॥ ४८ ॥
उक्तं तत्रोनपञ्चाशत्तमे राज्ञां सुम-
न्त्रणम् स्वयंवरे हि दोषःस्यात्कन्यै-
कस्मै प्रदीयताम् ॥ ६१ ॥ ४९ ॥
पञ्चाशत्तम उक्तं च राज्ञां भूयो हि
मन्त्रणम् ॥ तत्रैके मेलनंप्राहुर्हरि-
णा भेदनं परे ॥ ६२ ॥ ५० ॥
एकाधिके तु पञ्चाशत्तमे दूताःस
पत्रिकाः ॥राजेन्द्रत्वाय कृष्णस्य सं
गताःक्रथकैशिकौ ॥ ६३ ॥ ५१ ॥

शक्रशासनमूचुस्तेऽभिषेकार्थमितीर्य्यते ॥ विश्वासाय पुना राज्ञामन्यदूतागमोऽग्रतः ॥ ६४ ॥ ५१ ॥
अभिषेकार्थकं वस्तु स्वर्गात्सिंहाससनादिकम् ॥ आगतं चाभिषेकं च नृपाश्चक्रुरितीर्य्यते ॥ ६५ ॥ ५१ ॥
द्विपञ्चाशत्तमे स्तोत्रमुच्यते भैष्मकं हरेः ॥ स्वयंवरोपरोधश्च मथुरागमनं पुनः ॥ ६६ ॥ ५२ ॥
त्रिपञ्चाशत्तमे राज्ञो भीष्मकस्तान्व्यसर्जयत् ॥ स्वयंवरोपरोधेन ते च संमन्त्र्य सर्वशः ॥ ६७ ॥ ५३ ॥
दूतं च कालयवने कृष्णनाशैषिणो नृपाः ॥ शाल्वं संप्रेषयामासुःसविस्तरमिहोच्यते ॥ ६८ ॥ ५३ ॥

यवनाऽग्रे चतुःपञ्चाशत्तमे दूतवा-
क्यत. ॥ राज्ञां विज्ञापनं सर्वं विज्ञा-
पितमितीर्य्यते ॥ ६९ ॥ ५४ ॥

उत्तरं पञ्चपञ्चाशत्तमे यवनवाक्य
तः ॥ दूते तस्यापि गमनं कृष्णे यु-
द्धार्थमीर्य्यते ॥ ७० ॥ ५५ ॥

षट्पञ्चाशत्तमे प्राप्ते केशवे पुरवा-
सिनाम् ॥ महोत्सवोऽभवत्पश्चाद्या-
दवानां च मन्त्रणम् ॥ ७१ ॥ ५६ ॥

द्वार्वत्यां सप्तपञ्चाशत्तमे तु गमनं
मुदा ॥ यादवानां ससैन्यानां निवा-
सार्थमितीर्य्यते ॥ ७२ ॥ ५७ ॥

यवनस्याष्टपञ्चाशत्तमे तु वध उच्य
ते ॥ कृष्णेन मुचुकुन्दाद्धै संवादश्च
तयोरिह ॥ ७३ ॥ ५८ ॥

ऊनषाष्टितमे कृष्णो रम्यां द्वारवतीं
पुरीम् ॥ विश्वकर्माणमाहूय कारया
मास चित्रिताम् ॥ ७४ ॥ ५९ ॥
अथ षष्टितमे कृष्णःकन्यां हरति रु-
क्मिणीम् ॥ यदूनामभवद्युद्धं जरा
सन्धादिभिर्नृपैः ॥ ७५ ॥ ६० ॥
एकषाष्टितमे युद्धमभूत् कृष्णेन रु-
क्मिणः ॥ पाणिग्रहस्तुरुक्मिण्या द्वा
र्वत्यांहरिणोच्यते ॥ ७६ ॥ ६२ ॥
द्वियुक्षाष्टितमे द्यूतच्छद्मना रुक्मि-
णंबलः ॥ अनिरुद्धविवाहेऽहन्निति भो
जकटेपुरे ॥ ७७ ॥ ६२ ॥
त्रियुक्षाष्टितमे साम्बे कुरुरुद्धे स्वयं-
वरे ॥ पुरीं कर्षति रामे ते नताःस-
न्तोऽपतन्पदे ॥ ७८ ॥ ६३ ॥

चतुःषष्टितमे कृष्णो गत्वा प्राग्ज्योतिषं पुरम् ॥ ससैन्यं नरकं युद्धे जघानोग्रपराक्रमम् ॥ ७९ ॥ ६४ ॥

पञ्चषष्टितमे कृष्णः कन्यारत्नान्युपाऽहरत् ॥ स्वर्गे शक्रेण संगम्य पारिजातं तथाहरत् ॥ ८० ॥ ६५ ॥

षड्युक्षष्टितमे पुष्पं हरयेऽदाच्च नारदः ॥ भैष्म्यै ददौ स तच्छुत्वा सत्यभामाऽकरोद्रुषम् ॥ ८१ ॥ ६६ ॥

सप्तषष्टितमे कृष्णः क्रुद्धां ज्ञात्वाऽगमत्प्रियाम् ॥ सत्यभामामनुनयन्सापीर्ष्यावचनाऽभवत् ॥ ८२ ॥ ६७ ॥

अष्टषष्टितमे ध्यातो नारदो हरिणागतः ॥ अनयोःपारिजातार्थं संवादश्चानुवर्ण्यते ॥ ८३ ॥ ६८ ॥

एकोनसप्ततितमे प्रैषयद्दिवि नारद-
म् ॥ महेन्द्रवेश्म विज्ञप्त्यै पारिजा
तार्थमीश्वरः ॥ ८४ ॥ ६९ ॥
अथेन्द्रं सप्ततितमे नारदो वाक्यम
ब्रवीत् ॥ कृष्णोक्तं पारिजातार्थं स
नेत्यभ्यभाषत ॥ ८५ ॥ ७०॥
अथैकसप्ततितमे बहुधोक्तः शचीप-
तिः ॥ पारिजातं न दास्यामि कृष्णा
येत्यभ्यभाषत ॥ ८६ ॥ ७१ ॥
द्विसप्ततितमे दृष्ट्वा शक्रं हठवशं ग
तम् ॥ न दास्यतीति निश्चित्य ना
रदो द्वारकामगात् ॥ ८७ ॥ ७२ ॥
त्रिसप्ततितमे गत्वा कृष्णोक्तो नार-
दःपुनः ॥ देहि माहेन्द्र मद्वा वा सा
म्ना युद्धेन तत्तरुम् ॥ ८८ ॥ ७३ ॥

तथा स्वपुत्ररक्षार्थमपराजयमिच्छ-
ता ॥ कश्यपेनकृतं स्तोत्रं रुद्रस्ये-
तिनिरूप्यते ॥ ८९ ॥ ७३ ॥
चतुर्युक्सप्ततितमे हय्योर्युद्धमिती-
र्य्यते ॥ प्रद्युम्नस्य जयन्तेन सात्य-
केःप्रवरेणच ॥ ९० ॥ ७४ ॥
सपञ्चसप्ततितमे रात्रौ युद्धे स्थितेऽ
च्युतः ॥ बिल्वोदकेश्वरं स्तुत्वा वरं प्रा
पदितीर्य्यते ॥ ९१ ॥ ७४ ॥
षट्सप्ततितमे कृष्णःपारिजातं दि-
वोऽनयत् ॥ द्वारवत्यां सोत्सवायां वै
पुण्यार्थं कमितीर्य्यते ॥९२॥ ७६ ॥
ससप्तसप्ततितमे सत्त्यया पुण्यके कृ
ते ॥ पारिजातं हरिर्नीत्वाऽस्थापय-
त्पूर्ववद्दिवि ॥ ९३ ॥ ७७ ॥

अथाष्टसप्ततितमे नारदं रुक्मिणी फ
लम् ॥ पुण्यकानां विधिं चैवपर्य्य-
पृच्छदितीर्य्यते ॥ ९४ ॥७८ ॥
ऊनाशीतितमे भैष्म्यैविधिर्य उमयो
दितः ॥ सतीभ्यःपुण्यकस्यादौ ना-
रदेनोदितोऽद्य सः ॥ ९५ ॥ ७९ ॥
अथाशीतितमे श्रेष्ठं पुण्यकोच्चीर्णजं
फलम् ॥ पार्वती यत्सतीःपूर्वं नारदः
प्राह रुक्मिणीम् ॥ ९६ ॥ ८० ॥
एकाशीतितमे प्राह देवी देवविला-
सिनीः॥ शरीरावयवैश्वर्य्यदानि स्त्री
णां व्रतानिवै ॥ ९७ ॥ ८१
द्व्यशीतितम एवं च विशेषफलदानि
च ॥स्त्रीभ्यो व्रतान्युमाऽऽचख्यौ रु
क्मिण्यै नारदस्तथा ॥ ९८ ॥ ८२॥

अशीतितम आगत्य तुष्टो ब्रह्मा व-
रानदात् ॥ षट्पुरस्थाँ तपःकृष्टा न-
वध्यान् राक्षसान्सुरैः ॥ ९९ ॥ ८३॥
चतुर्भिरधिकाऽशीतितमे यज्ञाद्विलु-
म्पताम् ॥ दैत्यानां ब्रह्मदत्तस्य वधा
र्थं निर्गतो हरिः ॥ १०० ॥ ८४ ॥
पञ्चाशीतितमे युद्धं यदुभी रक्षसाम
भूत् ॥ क्षात्रियाँस्तत्सहायाँश्च कामो
वध्वाऽनयद्गृहाम् ॥ १०१ ॥ ८५ ॥
षडशीतितमे कृष्णःषाट्पुरा न्सनि-
कुम्भकान् ॥ जघान ब्रह्मदत्तस्य य
ज्ञःपूर्णत्वमागमत् ॥ १०२ ॥ ८६ ॥
सप्ताशीतितमे दित्यामन्धकोत्पत्ति
रुच्यते ॥ स्वभावस्तस्य दुष्टस्य त्रै-
लोक्यपरिपीडकः ॥ १०३ ॥ ८७ ॥

अष्टाशीतितमे प्रोक्तो मन्दरे त्वन्धके गते ॥ वधस्तस्याऽन्धकरिपोरीशात्त्रैलोक्यशङ्करः ॥ १०४ ॥ ८८ ॥

मुदा चैकोननवतितमे स्त्रीभि महोदधौ ॥ ज्ञातियुक्तस्य कृष्णस्य नीरक्रीडाऽनुवर्ण्यते ॥ १०५ ॥ ८९ ॥

क्रीडां कृत्वा तु नवतितमे भुक्तरसादिकः ॥ शौरिःसहाप्सरोभिर्वैछालिक्यं गीतमुज्जगौ ॥ १०६ ॥ ९० ॥

आहर चैकनवतितमेभानुमतीं बलात् ॥ निकुम्भस्तद्वधं चक्रे कृष्णःकन्यानिवर्त्तनम् ॥ १०७ ॥ ९१ ॥

वज्रनाभं द्विनवतितमे वै हन्तु मिच्छताः॥तत्पुत्रीकामयोगाय हंसाःशक्रेणचोदिताः ॥ १०८ ॥ ९२ ॥

रम्या हंसी त्रिनवतितमे कामगुणा-
ऽन्वगौ ॥ प्रभावती च तच्छ्रुत्वा स
कामाऽभूदितीर्य्यते ॥ १०९ ॥ ९३॥
तयाऽभिप्रार्थिता हंसी वज्रनाभे न-
टं जगौ ॥ सोऽप्यैच्छन्नटमानेतुं प्रद्युम्नो
ऽगा न्नटाकृतिः ॥ ११० ॥ ९३ ॥
चतुर्भिर्युक्तनवतितमे वज्रपुरे नटः ॥
कामोऽगाद्भृङ्गरूपेण प्रभावत्या नि-
वेशनम् ॥ १११ ॥ ९४ ॥
स्वीकृत्यपञ्चनवतितमे रम्यां प्रभा-
वतीम् ॥ प्रद्युम्नश्च तया रेमे गदसा
म्बौ च कन्यके ॥ ११२ ॥ ९५ ॥
सह षड्युक्तनवतितमेऽनङ्गः स्थितो
गुणान् ॥ सौधपृष्ठे प्रभावत्या वा-
र्षिका नभ्यवर्णयत् ॥ ११३ ॥ ९६ ॥

सुपुत्रैः सप्तनवतितमे दैत्यसुता बभुः॥
ता न्दृष्ट्वा दानवाश्चक्रु र्यदुभी रण-
मागताः ॥ ११४ ॥ ९७ ॥
मृधेऽह ह्याष्टनवतितमे वज्रासुरं स्म
रः ॥ स्वपौत्रं यदुपुत्राँ स्त्रीनिन्द्रो रा
ज्यं तदर्पयत् ॥ ११५ ॥ ९८ ॥
एकोनेषै शततमे विहिता विश्वकर्म
णा ॥ रम्या शक्राज्ञय द्वारवती स्व
र्गपुरोधिका ॥ ११६ ॥ ९९ ॥
ततः शततमेऽध्याये कृष्णः कमललो
चनः ॥ मणिपर्वतमानीय द्वार्वतीं प्र
विवेशह ॥ ११७॥ १००॥
अथैकयुक्शततमे रम्यां द्वारवतीस-
भाम् ॥ कृष्णाज्ञयागताः सर्वे यथा-
र्हं विविशु र्मुदा ॥ ११८ ॥ १०१ ॥

द्वियुक्तशततमेऽध्याये मुनिरिन्द्रा ज्ञ
याऽगतः ॥ चक्रे हरेःकथां तत्र कं-
सस्या मरणावधि ॥ १९ ॥ १०२
त्रियुक्तशततमे प्राह यदुमुख्येषु ना
रदः ॥ द्वारकामावसन्कृष्णः कर्म
चक्रेऽद्भुतं हि यत् ॥ १२० ॥ १०३ ॥
चतुःशततमेऽध्याये संक्षेपेणानुवर्णि
ताः॥ नाम्ना पुत्राश्च पौत्राश्च वराःप-
त्न्यश्च शार्ङ्गिणः ॥ २१ ॥ १०४ ॥
तत्पञ्चयुक्तबशतमे प्रद्युम्नस्य जानि-
र्हरेः ॥ हरणं वर्द्धनं चोक्तं शम्बरेण-
शिशोर्गृहे ॥ २२ ॥ १०५॥
वयस्थ.षट्शततमे रत्या सम्यक्प्र-
बोधितः ॥ प्रद्युम्नःसेनयासार्द्धं शम्ब
रेणाकरोद्रणम् ॥ २३ ॥ १०६ ॥

ससप्तयुक्शततमे शम्बरेण सहात्म-
वित् ॥ मायाविना तु मायावी प्र-
द्युम्नो युयुधे बली ॥ २४ ॥ १०६ ॥
अथाष्टयुक्शततमे दुर्गां स्तुत्वाऽप स
द्वरं ॥ शम्बरं सानुगं हत्वा कामो-
ऽरमत कान्तया ॥ २५ ॥ १०८ ॥
कामो नवोत्तरशततमे वै कान्तया
ऽगमत् ॥ द्वारकां बान्धवाःप्राप्तं दृष्ट्वा
ऽसन्मुदिताश्च तम् ॥ २६ ॥ १०९ ॥
सपङ्क्तियुक्शततमे प्रद्युम्ने न हला-
युधः ॥ प्राह्लादभ्यर्थितस्तस्मै सर्वांप
न्नाशक्नुतस्तुतिम् ॥ २७ ॥ ११० ॥
ऋषिणैकादशशततमे सम्यक्वाविनि
श्चितः ॥ विष्णुर्वाच्येषु सर्वेषु दक्षि-
णायुक्त उत्तमः ॥ २८ ॥ १११ ॥

पुत्रा न्सद्वादशशततमे पाहीति वै
द्विजः ॥ कृष्णं शरणमापन्नः सोऽर्जु
नं विनियुक्तवान् ॥ २० ॥ ११२ ॥
तस्मिँस्त्रयोदशशततमेऽशक्ते हि र
क्षणे ॥ रथस्थः सद्विजः कृष्ण उदीचीं
दिशमाविशत् ॥ ३० ॥ ११३ ॥
ततश्चतुर्दशशततमे लोकाचलाद्बहिः ॥
गत्वा महन्महः कृष्णो विप्राय प्रद-
दौ सुतान् ॥ ३१ ॥ ११४ ॥
पञ्चदशशततमेऽस्मिन्नध्याये सूनवो
द्विजेनाप्ताः ॥ अर्जुनपृष्टः कृष्णो ब्रह्म
प्राग्य न्न्यवर्णयद्दृष्टम् ॥ ३२ ॥ ११५ ॥
प्रोक्तं सषोडशशततमे कर्माऽद्भुतं म
हत् ॥ संक्षेपेण समाहृत्य कृष्णाख्य
स्य मुदावहम् ॥ ३३ ॥ ११६ ॥

सप्तदशशततमेऽस्मिन्नभिमतमी-
शानतो वरं प्राप ॥ स्तुत्वा बाणःका-
ले स्वनाशिनीं ध्वजभङ्गजां चोल्का
म् ॥ ३४ ॥ ११७ ॥

प्रापसाष्टादशशततमे बाणसुता वर
म् ॥ शिवायाःश्रेष्ठकान्तत्व स्मृत्वा
तं च मुमोह सा ॥ ३५ ॥ ११८ ॥

ऊनविंशयुक्शततमे यदृच्छयानिशि
याऽनिरुद्धसुरताभिसंगता ॥ प्रियमा
नयेति सखि मे ह्युषाह्वया खलुचित्र
लेखचतुरां समादिशत्॥३६॥११९ ॥

रेमे विंशोत्तरशततमे प्राप्योषा प
तिम् ॥ ज्ञातोऽसुराञ्जघानाजौ बा-
बाणाद्बन्धनमापसः॥ ३७॥ १२० ॥

एकविंशाधिकशततमे चक्रे ह्युषा-

पत्तिः ॥ नागवद्धः स्तुतिं चार्य्या स्तु
ष्टा सा तत्तनोःसुखम् ॥ ३८ ॥ '२१ ॥
द्वाविंशयुक्शततमेऽनिरुद्धेऽदृष्टतां
गते ॥ यदूनां मन्त्रणं चोक्तं नार-
दात्तत्कथागमः ॥ ३९ ॥ '२२ ॥
त्रयोविंशाधिकशततमे कृष्णबलस्म
राः ॥ गरुडस्था विजित्वाऽग्नीन्बा
णसैन्यं समाययुः ॥ ४० ॥ २'३ ॥
चतुर्विंशाधिकशततमे ग्रामाथके र
णे ॥ पराजितेन तु हरे ज्वरेण स्तु-
तिरुच्यते ॥ ४ ॥ '२४ ॥
पञ्चविंशाधिकशततमे भग्ने ज्वरे शि
वः ॥ रणे वभूव बाणार्थे रणश्च शि
वकृष्णयोः ॥ ४२ ॥ '२५ ॥
षट्विंशयुक्शततमे शिवे कृष्णाऽस्त्र

जृम्भिते॥ मेलनं कृष्णहरयो स्स्तुत्यै
कत्वनिरूपणम् ॥ १४३ ॥ १२६ ॥
सप्तविंशाधिकशततमे याते गुहे र-
णात् ॥ बाणस्य च वरप्राप्तिः कृष्ण-
स्य विजयस्तथा ॥ १४४ ॥ १२७ ॥
अष्टाविंशाधिकशततमेऽनिरुद्धं स-
होषमुद्धृत्वा ॥ जित्वा वरुणं कृ-
ष्णो गत्वा देवानपूजय त्स्वपुरी
म् ॥ १४५ ॥ १२८ ॥
ऊनत्रिंशाधिकशततमे योषा समा
गता ॥ तदुत्सवःपुरे तेषां हरेःश्रेष्ठत्व
मुच्यते ॥ १४६ ॥ १२९ ॥
पूर्वं तु प्रेषितं पत्रं तुलस्याःकृष्णस-
न्निधौ ॥ लग्नं तदद्य तत्पत्सु सिद्धो
ऽयं मे मनोरथः ॥ १४७ ॥

यौंतःकार्येषु बाह्येष्वपि च समतया संवस न्ज्ञानरूपो भूतेजोवातखाप्सु प्रकटयति विभु श्चात्मतत्वं दयालुः॥ अज्ञात्वा तं प्रमादातिशयविनिहता जीवसंघा भ्रमन्ति सत्येवं तज्ञनौघं ह्यवति जनकव च्छ्रीपति स्तं नतो स्मि ॥ १४८ ॥ १२९ ॥

इति श्रीहरिवंशस्य तुलसीतरु रूपस्य विष्णाख्यस्य द्वितीय पर्वणस्तत्पत्ररूपा कथासूत्रप्रकाशिनी अव तरणिका समाप्ता शुभम् ॥

अथातो भविष्यपर्व प्रारम्भः ॥

श्रीगुरुगणपसुरेश्वरशिवगीर्हरिभूसुरेषु मे नतयः ॥ येषां कृपावलोकैः कृती भवेद्दै क्षमादेवः ॥ १ ॥

गङ्गाजलेन्दुखण्डं कृत्यं मम याद्वि-

भावयेन्नित्यम्॥ भूयः कृष्णपदाब्जं स्म
तुं कर्तुं पवित्रं माम् ॥ २ ॥
पञ्चत्रिंशोत्तरशतै रध्यायैरिह गीय
ते ॥ प्रायेण कृष्णसत्कीर्तिस्तदंशा-
नां शुभाःकथाः ॥ ३ ॥
तत्र तु प्रथमेऽध्याये जनमेजयवंश
जान् ॥ प्रोवाच शौनकादिभ्यो रा-
ज्ञःसौति र्मुदावहः ॥ ४ ॥ १ ॥
द्वितीये चाश्वमेधार्थे प्रवृत्ते जनमे-
जये ॥ व्यासस्यागमनं तत्र तयोःसं
वाद उच्यते ॥ ५ ॥ २ ॥
भविष्यच्चास्य दैवीयं व्यासःपृष्टस्तृ
तीयके ॥ पारीक्षितमुवाचादौ तुरी-
ययुगलक्षणम् ॥ ६ ॥ ३ ॥
चतुर्थे तु कले र्व्यासो दोषमुक्त्वा त

दा बहु ॥ पुनःकृतयुगोत्पत्तिं जगा-
द्जनमेजयम् ॥ ७ ॥ ४ ॥
पञ्चमे तु गते व्यासे यज्ञं पारीक्षि-
तोऽकरोत् ॥ इन्द्रस्तन्माहिषीं दैवात्
प्रविश्याऽश्वं व्यधर्षयत् ॥ ८ ॥ ५ ॥
षष्ठे च विश्वावसुना बोधितो नृप
उच्यते ॥ इन्द्रेणेति कृतं मिथ्या त
त्कथाश्रवजंफलम् ॥ ९ ॥ ६ ॥

अथातो पुष्कर प्रादुर्भावः ॥

बालालापेन विदुषो वाक्यमीश्वरगा
मि यत् ॥ इच्छ म्यमाम्यहं देवीं त्रै
लोक्यं या नियच्छति ॥ १० ॥ ७ ॥
सप्तमे वैभवं विष्णो स्तदादौ पौष्क
रं नृपः ॥ मुनिं पृच्छति सोप्याह स
लक्ष्यपरलक्षणम् ॥ ११ ॥ ७ ॥

अष्टमेऽनित्यतां दृष्ट्वा सृष्ट्यादे र्मु
क्तिसाधनाः ॥ विज्ञा भवन्त्यतःप्रा
ह युगमानं प्रदर्शयन् ॥ १२ ॥ ८ ॥
नवमेऽनित्यतामस्य संसारस्यप्रदर्श
यन् ॥ मुहुर्मुहुःप्रभुकृतं प्रलयं वक्ति
वै मुनिः ॥ १३ ॥ ९ ॥
दशमे ऋत्विगुत्पत्ति र्लयाब्धौ भ्रान्ति
रुच्यते ॥ मार्कण्डेयस्य मायाभिःसं
वादश्च मुनीशयोः ॥ १४ ॥ १० ॥
एकादशे तु पञ्चानां भूतानां महतां
क्रमात् ॥ हिरण्याब्जस्य चोत्पत्ति र्ना
भ्यामीशस्य चोच्यते ॥ १५ ॥ ११ ॥
द्वादशे पौष्करे पद्मे सम्भूत श्चतुरा
ननः ॥ लोकाचलार्णवानां च कल्प
ना तत्र चोच्यते ॥ १६ ॥ १२ ॥

त्रयोदशे युगादौ वै संभूतौ मधुकैट
भौ ॥ बाहुयुद्धेन कृत्वारौ हतौ तौ नी
रशायिना ॥ १७ ॥ १३ ॥

चतुर्दशे तथा ब्रह्मपुत्रा व्याहृतयो
ऽपरे ॥ वर्ण्यन्तेच समुत्पन्ना धर्मकश्य
पसंभवाः ॥ १८ ॥ १४ ॥

पुरा पञ्चदशे सांख्ये नोक्तां संक्षेप-
तःसृतिं ॥ श्रुत्वा नृपो मुनिं त्वत्र पृ
च्छति स्तुतिपूर्वकम् ॥ १९ ॥ १५ ॥

षोडशे सांख्यमत्राह मुनिःपृष्टो नृपं
मुदा ॥ यज्ज्ञात्वाभीष्टसिद्धिं वै ल-
भेन्मोक्षाभिधान्नरः ॥ २० ॥ १६ ॥

प्रोक्तःसप्तदशे क्षोणिचन्द्राङ्गरादिसं
भवः ॥ जन्ममृत्यू च संग्राही त्या
गी मुक्तिं भजेदिति ॥ २१ ॥ १७ ॥

सृष्ट्यादौ कर्मबन्धाद्धाऽष्टादशे जी
वसंभवः ॥ कर्मबन्धविहीनस्य ब्र-
ह्मस्थितिरुदीर्य्यते ॥ २२ ॥ १८ ॥
ब्रह्माण्ड मूनविंशे तु भित्वा सिद्धःप्र
गच्छति ॥ भूतेजोवातनाकाप्सु तदा
विघ्नभयं महत् ॥ २३ ॥ १९ ॥
विंशे त्यक्तबहिःकर्मा मनसो धार-
णानुगः ॥ ब्रह्मरूपेण तत्कर्म कुर्व-
न्मुह्यति योगकृत् ॥ २४ ॥ २० ॥
दुष्करं चैकविंशेतु मन्वानो ब्रह्मयो
गकम्॥क्षत्राख्यं यत्क्रियायोगं सुखं पृ
च्छति वै नृपः ॥ २५ ॥ २१ ॥
द्वाविंशे तु क्रियायोगैःसिद्धो गच्छे-
त्परंपदम् ॥ अन्यथा स्वर्गमत्राह क
र्मिणां च समुद्भवः ॥ २६ ॥ २२ ॥

त्रयोविंशे क्रियाख्याने यज्ञकर्मोच्य
तेऽधुना ॥ वक्तुं तदेव ऋषिभिःपुरा
कृतमितीर्य्यते ॥ २७ ॥ २३ ॥
चतुर्विंशेऽपि वेदोक्तं कर्मकार्य्यं गृह
स्थितैः ॥ तद्दते स्यान्न संसारे गतिः
संसरतामिह ॥ २८ ॥ २४ ॥
ब्रह्मोक्ताःपञ्चविंशे तु चक्रु र्युद्धं सुरा
ऽसुराः ॥ आदियज्ञमभीप्सन्तःस्वा
नुरूपक्रियात्मकम् ॥ २९ ॥ २५ ॥
षड्विंशे तु मधुं विष्णु र्हतवानित्यु-
दीर्य्यते ॥ स्तुतिस्तस्याऽनुरूपा च ह
यग्रीवस्वरूपिणः ॥ ३० ॥ २६ ॥
पुण्यपापाःसुरा दैत्याःशमकामादि-
वृत्तयः ॥ विष्णुरात्मा मधुर्मोहो भा
वनैषात्र दृश्यते ॥ ३१ ॥ २६ ॥

सप्तविंशे तु याऽविद्या सञ्छादयति
देहिनम् ॥ तदुत्पत्तिगुणा न्प्राह यां
ज्ञात्वाऽमृतमश्नुते ॥ ३२ ॥ २७ ॥
अष्टाविंशे च महतां न शक्तिस्तप-
सा विना ॥ एतत्प्रकटयन्प्राह विष्णवा
दीनां तपस्क्रियाः ॥ ३३ ॥ २८ ॥
ऊनत्रिंशे तु ब्रह्मास्त्रचक्रवज्रादिसं-
भवः ॥ तथा विमाननक्षत्रदेवसेना-
दि संभवः ॥ ३४ ॥ २९ ॥
त्रिंशे दैवं बलीत्यत्र दृष्टान्तममृतो-
द्भवे ॥ यस्मा त्समश्रमाःकेचित्फा-
पु र्भागं न केचन ॥ ३५ ॥ ३० ॥
एकत्रिंशे हिरण्यस्य कशिपुर्यस्य वे-
श्मनि ॥ बले स्तस्याध्वरे विष्णुर्ज-
ग्राहैन्द्रं पदं प्रभुः ॥ ३६ ॥ ३१ ॥

द्वात्रिंशेऽरुद्रभागेन दक्षयज्ञविनाशनम् ॥ हरीशयो रणश्चानु यज्ञपूर्त्तिस्तथेोच्यते ॥ ३७ ॥ ३२ ॥

पुष्कर प्रादुर्भावः समाप्तः ॥

त्रयस्त्रिंशे तु वाराहःकथारम्भःसुखावहः ॥ विष्णोःपुण्यं च माहात्म्यं तत्कृतःप्रलयस्तथा ॥ ३८ ॥ ३३ ॥
चतुस्त्रिंशे तु धरणी रसातलगतोद्धृता ॥ वाराहं रूपमास्थाय विष्णुना यज्ञरूपिणा ॥ ३९ ॥ ३४ ॥
पञ्चत्रिंशे तु पृथिवीं समुद्धृत्यादिसूकरः ॥ मेरुं मेरो श्च परितस्थापयामास पर्वतान् ॥ ४० ॥ ३५ ॥
षट्त्रिंशे तु वराहस्य मुखाज्जज्ञे प्रजापतिः ॥ वर्ण्यतेऋषिवंशाश्च धर्म-

कश्यपसंभवाः ॥ ४१ ३६ ॥
सप्तत्रिंशे सुरवृषदैत्ययक्षोरगादयः॥
उत्तमाःस्वाधिकारेषु वर्ण्यन्ते ब्रह्मणा
कृताः ॥ ४२ ३७ ॥
अष्टत्रिंशे तु देवानामसुरैः सुमहार-
णः ॥ स्तंभितोऽत्र रणे शक्रो हिरण्या
क्षेण वर्ण्यते ॥ ४३ ॥ ३८ ॥
वराहेण त्वथैकोनचत्वारिंशेमहाहवे॥
चक्रेण शितधारेण हिरण्याक्षो निपा
त्यते ॥ ४४ ॥ ३९ ॥
चत्वारिंशे वराहेण शक्रशासनमुच्य
ते ॥ पर्वतानां तथेन्द्रेण पक्षच्छेदो
विधीयते ॥ ४५ ॥ ४० ॥
हिरण्यकशिपो श्चैकचत्वारिंशे महा
तपः ॥ वरस्य वर्ण्यते प्राप्ति र्नारासिं

ह्यपु र्हरेः ॥ ४६ ॥ ४१ ॥
द्विचत्वारिंशकेऽपश्यद्धिरण्यकशिपोः
सभाम् ॥ नृहरि स्तत्र गन्धर्वदेवदैत्या
प्सरोगणान् ॥ ४७ ॥ ४२ ॥
त्रिचत्वारिंशके ज्ञात्वा प्रह्लादोऽवर्ण
य त्प्रभुम् ॥ दिव्येन चक्षुषा दैत्या
ददृशु र्नृहरिं तदा ॥ ४८ ॥ ४३ ॥
नृसिंहस्य चतुश्चत्वारिंशके ग्रहणेर-
ताः ॥ अस्त्राणि चिक्षिपु दैत्या स्तेन
ग्रस्तानिकृत्स्नशः ॥ ४९ ॥ ४४ ॥
सर्वाण्यस्त्राणि ते पञ्चचत्वारिंशे वि
चिक्षिपुः ॥ नृसिंहोपरि दैत्येन्द्रा मा
याश्च मयनिर्म्मिताः ॥ ५० ॥ ४५ ॥
षट्चत्वारिंशके प्राप्य हिरण्यकशि
पुर्भयम् ॥ धाव न्गदांसमादाय त्रैलो

वयं समकम्पयत् ॥ ५१ ॥ ४६ ॥
हिरण्यकशिपुःसप्तचत्वारिंशे हतो र
णे ॥ महात्मना नृसिंहेन दैवैरस्य कृ
ता स्तुतिः ॥ ५२ ॥ ४७ ॥
वामनस्याष्टचत्वारिंशके रम्यकथो-
दये ॥ अभिषेको बले दैत्यराज्ये दै
त्यैःकृतोमुदा ॥ ५३ ॥ ४८ ॥
ऊनपञ्चाशत्तमे तु त्रैलोक्यस्य जिगी
षया ॥ सज्जीकृतबलस्यात्र बलेरुद्यो-
ग उच्यते ॥ ५४ ॥ ४९ ॥
दैत्यानामथ पञ्चाशत्तमे वै वीर्य्य-
शालिनाम् ॥ रणैषिणां तु सर्वेषां र-
थारोहणमुच्यते ॥ ५५ ॥ ५० ॥
सेनाभि रेकपञ्चाशत्तमेऽपि बहुभिः
सह ॥ रथारूढो बलिश्चाजौ गच्छ-

त्याशु रणोत्सुकः ॥ ५६ ॥ ५१ ॥
द्विपञ्चाशत्तमे देवा श्रुत्वा दैत्यान् रणो
त्सुकान् ॥ तिष्ठन्ति सहसेनाभिस्त्व
रिताःसज्जितायुधाः ॥ ५७ ॥ ५२ ॥
त्रिपञ्चाशत्तमे दैत्या देवैःसह रणो
त्सुकाः ॥ द्वन्द्वीभूय स्थिता योद्धुं पृ
थग्पृथगितीर्य्यते ॥ ५८ ॥ ५३ ॥
ध्रुवाख्यस्य चतुःपञ्चाशत्तमे तु र-
णे वसोः ॥ भङ्गो मुख्य स्तथाऽन्ये
षां पृथक् संग्राम उच्यते ॥५९॥५४॥
धरो भग्नो रणे पञ्चपञ्चाशत्तम
के वसुः ॥ पुलोमपवनादीनां संग्रामो
भीम उच्यते ॥ ६० ॥ ५५ ॥
षट्पञ्चाशत्तमे प्रोक्तो वीराणां क्ष
यकृद्रणः ॥ विरोचनस्य साध्यस्य-

तथाऽदित्यकुजम्भयोः ॥ ६१ ॥ ५६॥
वर्ण्यते सप्तपञ्चाशत्तमेऽपि सुमहार
णः ॥ हरिदेवासिलोम्नोश्च वृत्रस्वर्वै-
ध्रयोस्तथा ॥ ६२ ५७ ॥
चतुर्भिरष्टपञ्चाशत्तमे रुद्रैःसमंर-
णः ॥ प्रोच्यते चैकचक्रादिदानवा-
नां पृथक् पृथक् ॥ ६३ ॥ ५८ ॥
ऊनषष्टितमे प्रोक्तःसंग्रामो भीमद-
र्शनः ॥ प्रह्लादकालयोश्चापि निष्कु
म्भ वृषपर्वणोः ॥ ६४ ॥ ५९ ॥
अथ षष्टितमे भीमःसंग्रामो वर्ण्यते
ऽद्भुतः ॥ ससैन्यस्य कुबेरस्याऽनुह्ला
दस्याऽसुरस्यच ॥ ६५ ॥ ६० ॥
एकषष्टितमे युद्धं भीषणं वर्ण्यतेऽधु
ना ॥ वरुणस्य ससैन्यस्य विप्रचि

स्तेर्महात्मनः ॥ ६६ ॥ ६१ ॥
द्विषष्टितम एवं च दैत्यार्हवे भया-
कुले ॥ योद्धुं ससार हुतभुक्तस्य-
स्तुति रुदीर्य्यते ॥ ६७ ॥ ६२ ॥
त्रिषष्टितम इत्युक्त स्वसैन्ये वह्नि-
नाऽऽकुले ॥ कृते बलिर्जगामाजौ
वरदानादिभिर्बली ॥ ६८ ॥ ६३ ॥
चतुःषष्टितमे युद्धं वर्ण्यते बलिशक्र
योः ॥ मत्वाऽजेयं बलिं शक्र स्त्वप-
यातो रणाजिरात् ॥ ६९ ॥ ६४ ॥
पञ्चषष्टितमे लक्ष्मी स्त्रैलोक्यात्म
स्वरूपिणी ॥ बलिमागत्य सम्वादं
कृत्वातस्थौ तदाश्रया ॥ ७० ॥ ६५ ॥
षट्षष्टितम एवाह रणे दैत्यैः परा-
जिताः ॥ सुराःसादितिमारीचा ब्र-

ब्रह्मलोकं गता इति ॥ ७१ ॥ ६६ ॥
सप्तषष्टितमे देवा ब्रह्मणा शिक्षिता
ययुः ॥ क्षीरोदस्यामृतं स्थानं प्रा-
प्य तप्तुं तपःस्थिताः ॥ ७२ ॥ ६७॥
अष्टषष्टितमे देवैः सहकर्तुं तपःस्थि
तः ॥ कश्यपः कृतवां स्तोत्रं वेदोक्तं
वेदविद्भिभोः ॥ ७३ ॥ ६७ ॥
अथोऽनसप्ततितमे प्रसन्नःकश्यपेऽभ
वत् ॥ पुत्रत्वेन वृत स्तेनाऽदित्या
गर्भगतो हरिः ॥ ७४ ॥ ६९ ॥
स सप्ततितमेऽदित्या गर्भा द्वै वाम
नोऽभवत् ॥ स्ततःसर्वै र्ययौ यज्ञं
बलेरङ्गिरसा सह ॥ ५७ ॥ ७० ॥
अथैकसप्ततितमे प्रतिगृह्य पदत्रयम्॥
वामनो बलिना दत्तं विश्वरूपं चका

त्समाधिश्च वर्ण्यते ॥ ८६ ॥ ८० ॥
एकाशीतितमे कृष्णःसमाधौ ध्यान-
तत्परम् ॥ पिशाचमात्मनोरूपं प्रस
न्नोऽदर्शयद् घृणीः ॥ ८७ ॥ ८१ ॥
द्व्यशीतितम एवं सः कृष्णं दृष्ट्वा स
माधिगम् ॥ नेत्रे उन्मील्यबाह्यस्थं दृ
ष्ट्वा स्तुत्वा ननर्त्त वै ॥ ८८ ॥ ८२ ॥
त्र्यशीतितम एवाऽऽप्ति र्घण्टाकर्णस्य
वर्ण्यते ॥ प्रीतात्कृष्णा द्वर्यांतु स्व-
र्गसायुज्ययोर्द्दुतम् ॥ ८९ ॥ ८३
चतुर्भिरधिकाशीतितमे कैलाशमाग
तः ॥ कृष्णस्तपश्चकारेति पुत्रार्थं द्वा-
दशाब्दिकम् ॥ ९० ॥ ८४ ॥
पञ्चाशीतितमे यत्र तप्तं कृष्णेन तत्त
पः ॥ द्रष्टुं देवगणाश्चान्ये गन्धर्वा

ध्याः समायुः ॥ ९१ ॥ ८५ ॥
षडशीतितमे देवा यत्र कृष्णेन संग
ताः ॥ तं देशं सगणः सोमो द्रष्टुं शर्वः
समागमत् ॥ ९२ ॥ ८६ ॥
सप्ताशीतितमे कृष्ण स्तुष्टाव वृषभ
ध्वजम् ॥ स्तुत्या स्तुत्यं जगत्स्तुत्यः
सहोमं सगणं शिवम् ॥ ९३ ॥ ८७ ॥
अष्टाशीतितमे प्राप हरा त्सूनुवरं ह
रिः ॥ एकात्मना शिवेनापि कृष्ण-
स्तुतिरुदीर्य्यते ॥ ९४ ॥ ८८ ॥
प्राह चैकोननवतितमे श्रेष्ठत्वसंशये ॥
मुनीनामीश्वरो मध्ये चैकात्म्यं शि
वकृष्णयोः ॥ ९५ ॥ ८९ ॥
अंतर्हितोत्र नवतितमे स्तुत्वा हरो-
हरिम् ॥ गमनं स्वालयेऽन्येषां बदरी

गमनं हरेः ॥ ९६ ॥ ९० ॥
नरकस्यैकनवतितमे पौण्ड्रनृपः सखा ॥ हरिणा चक्रमे योद्धुं दुर्मति नृपसंसदि ॥ ९७ ॥ ९१ ॥
पौण्ड्रकस्य द्विनवतितमे राज्ञो दुरात्मनः॥ मुनिना नारदेनाऽथ संवादो वर्ण्यतेऽद्भुतः ॥ ९८ ॥ ९२ ॥
योद्धुं स्वीयै स्त्रिनवतितमे वै राजभिः सह ॥ रुरोध द्वारकां रात्रौ सेनाभिःपौण्ड्रको नृपः ॥ ९९ ॥ ९३ ॥
चतुर्भि र्युक्तनवतितमे पौण्ड्रं नृपै र्बलैः ॥ सहागतं यादवाश्च निष्क्रम्य युयुधुः पुरात् ॥ १०० ॥ ९४ ॥
वर्ण्यते पंचनवतितमे युद्धं हि सेनयोः ॥ एकलव्येन चान्येषां वाक्यं

सात्यकिपौण्ड्रयोः ॥ १०१ ॥ ९५ ॥
युद्धं षडुत्तनवतितमेऽभूत्परमाद्भुत-
म् ॥ वर्ण्यते पौण्ड्रकस्याऽस्त्रैः रथ-
संस्थस्यसात्यकेः ॥ १०० ॥ ९६ ॥
तयोःसप्तनवतितमे चैवं महाद्भुत-
म् ॥ प्रणष्टगदयो रम्यं बाहुजन्यं च
वर्ण्यते ॥ १०३ ॥ ९७ ॥
रणोऽष्टयुत्तनवतितमे रामेण वर्ण्य-
ते ॥ एकलव्यस्य सेनानां वधो मू-
र्छापि तस्यवै ॥ १०४ ॥ ९८ ॥
एकोनके शततमे रणःसात्यकिपौ-
ण्ड्रयोः ॥ तथैकलव्यबलयो र्वण्यते भी
मदर्शनः ॥ १०५ ॥ ९९ ॥
कृष्णागमःशततमे रणभूमौ निगद्यते ॥
कृष्णस्य पौण्ड्रकस्यापि संवादःपर-

मारुतः ॥ १०६ ॥ १०० ॥
अथैकयुक्शततमेवधः पौण्ड्रस्यवर्ण्यते ॥ चक्रेण चक्रिणो युद्धे चक्रिणा हरिणादिना ॥ १०७ ॥ १०१ ॥
तथा द्वियुक्शततमे रणे रामा त्रिषा दपे ॥ भग्ने वृष्णिषु कृष्णेन कैलाशोदन्तवर्णनम् ॥ १०८ ॥ १०२ ॥
त्रियुक्शततमे प्राह हंसडिम्भकयोः कथाम् ॥ विचक्रसहितां रम्यां राज्ञा पृष्टो मुनीश्वरः ॥ १०९ ॥ १०३ ॥
तच्चतुर्युक्शततमे हंसडिम्भकयोर्जनुः ॥ वर्ण्यते ब्रह्मदत्तस्य महिषीभ्यां तदालये ॥ ११० ॥ १०४ ॥
ततपंचयुक्शततमे संतुष्टा ड्डिम्भहंसयोः ॥ शिवात्प्राप्तिर्वरस्याजौ स-

हायगणयोस्तथा ॥ ११ ॥ १०५ ॥
षड्युक् शततमे प्राप्तवरयो हंसडिं-
म्भयोः ॥ मृगया वर्ण्यतेऽरण्ये मुनि
मण्डलसान्निधौ ॥ ११२ ॥ १०६ ॥
तौ सप्तयुक्शततमे हंसडिम्भौ मुदा
कृतौ ॥ काश्यपस्य ततोऽन्यत्र दुर्वा
सस्स्थानमागतौ ॥ ११३ ॥ १०७ ॥
तौ ह्यऽष्टयुक्शततमे यतीन्दुर्वाससं
रुषा ॥ क्षिपन्तौ वाक्शरैःसख्या हंस
डिम्भौ सुशिक्षितौ ॥ ११४ ॥ १०८ ॥
द्वेष्यौ नवोत्तरशततमे तौहंसडिम्भ
कौ ॥ शापंदुर्वाससः प्राप्तौ कृष्णा द्व
ध्यत्वमाशु वै ॥ ११५ ॥ १०९ ॥
यातौ दशोत्तरशततमे तौ हंसडिम्भ
कौ ॥ यतीन्क्षिप्त्वाऽथ दुर्वासा यति-

भि द्वारिकामगात् ॥ ११६ ॥ ११० ॥
एकादशोत्तरशततमे तौ द्वारिकां सत्त्वरम् ॥ गत्वा न्यवेदयत्कृष्णं दुर्वासाःकर्म तत्तयोः ॥ १७ ॥ ११ ॥
हरौ सद्वादशशततमे विज्ञप्ति रीर्यते ॥ यतीशस्याथ कृष्णस्य प्रतिज्ञा निग्रहे तयोः ॥ १८ ॥ १२ ॥
त्रयोदशोत्तरशततमे वै हंसडिम्भकौ ॥ यजने राजसूयस्य कृतवन्तौ हि मन्त्रणम् ॥ ११९ ॥ १३ ॥
चतुर्दशोत्तरशततमे प्राग्घंसडिम्भकौ ॥ प्रेषयामासतु दूतं कृष्णाय करकारणात् ॥ १२० ॥ १४ ॥
पंचदशयुक्शततमे कृष्णं दूतोऽवदत्तयोरुक्तिम् ॥ देहि करं वा युद्धं त-

च्छुत्वाऽभूत्सदोगतो ह्रासः २१।११५
सषोडशशततमे प्रत्युक्ति हंसडिम्भ
योः ॥ दूतंकृष्णेन तद्दूत विप्रशिक्ष
णमुच्यते ॥ ३२ ॥ २६ ॥
सप्तदशयुजिशततमे प्रत्याऽगा द्धंस
डिम्भयो र्दूतः ॥ कृष्णा त्सात्याकि
ना सह दूतत्वेपि प्रवीरेण ३३ ॥ २७
श्रुत्वा साष्टादशशततमे दूताद्धरेः
स्तुतिम् ॥ निर्भर्त्स्य सात्यके हंसः
कृष्णादेशं समाशृणोत् ३४ ॥ २८
ऊनविंशाधिकशततमे हंसगृहेरुषा ॥
हंसस्य सात्यके रुक्तिःप्रत्युक्तिश्चेह
वर्ण्यते ॥ १२४ ॥ २९ ॥
तयो विंशाधिकशततमे दूतमुखाद्ध
चः ॥ श्रुत्वा युद्धाय सेनाभिः कृ-

ष्णोऽगात्सह पुष्करम् २६ ॥ १२०
एकविंशोत्तरशततमे तौ हंसडिम्भ
कौ ॥ भूतेशाभ्यां विचक्रेण सेना
भिः पुष्करं गतौ ॥ २७ ॥ २१ ॥
द्वाविंशयुक्शततमे सेनयो रुभयो
रणः ॥ वर्ण्यते भीषणाकारो यत्राभू
दसृगापगा ॥ २८ ॥ २२ ॥
त्रयोविंशोत्तरशततमे द्वन्द्वरणः पृथ
क् ॥ वीराणां वर्ण्यते यत्र विचक्रो
हरिणा हतः ॥ २९ ॥ २३ ॥
चतुर्विंशाधिकशततमे शौर्य्यवतो-
र्द्वयोः ॥ सुचिरं हंसबलयो र्वर्ण्यते
युद्धमुत्तमम् ॥ १३० ॥ २४ ॥
पंचविंशोत्तरशततमे सात्यकिडि-
म्भयोः ॥ वर्ण्यते बाणयुद्धं च खड्

गयुद्धं च सुन्दरम् ॥ ३१ ॥ १२५ ॥
षड्विंशयुक्शततमे हिडिम्बोऽपसृ
तो रणे ॥ रामाद्यस्य भयाद्भग्नौघ
सुदेवोग्रसेनकौ ॥ ३२ ॥ २६ ॥
सप्तविंशोत्तरशततमे गोवर्द्धनागमः
॥ सर्वेषां निशि हंसेन रणः कृष्ण
स्य वर्ण्यते ॥ ३३ ॥ २७ ॥
अष्टाविंशोत्तरशततमे छन्नो नदीह्र
दे ॥ हंसः कृष्णाङ्घ्रिपातेन प्राणैस्त्य
क्त इतीर्य्यते ॥ १३४ ॥ १२८ ॥
सोनात्रिंशे शततमे भ्रातु र्मार्गं गतो
ह्रदे ॥ जिह्वामुच्छिद्य मरणं डिम्भो
जग्राह दुःखितः ॥ १३५ ॥ २९ ॥
सार्द्धं त्रिंशोत्तरशततमे नन्दयशोद
योः ॥ सङ्गमः प्राह हरिणा तथा ते

षां विसर्जनम् ॥ ३६ ॥ १३० ॥

एकत्रिंशोत्तरशततमे वैद्यावर्तीगमे ॥ संगमः पुष्करे मार्गे वर्ण्यंते मुनिभिर्हरेः ॥ ३७ ॥ ३१ ॥

द्वात्रिंशयुक्शततमे भारत श्रवणादिकम् ॥ पृथक्पर्वसु कृत्यञ्च वर्ण्यते तत्फलानि च ॥ ३८ ॥ ३२ ॥

त्रयस्त्रिंशोत्तरशततमे त्रिपुरदानवान् ॥ शङ्करोऽनाशयत् बाणेनैकेन त्रिपुरान्वितान् ॥ ३९ ॥ ३३ ॥

चतुस्त्रिंशोत्तरशततमे वंशस्य वै हरेः ॥ आरम्भादासमाप्तेश्च कथासंक्षेपवर्णनम् ॥ १४० ॥ ३४ ॥

पञ्चत्रिंशाधिकशततमे वंशस्ययद्धरेः ॥ श्रवणात् स्मरणात् पाठात् पूज

नातू फलमुच्यते ॥ ४१ ॥ १३५ ॥
गङ्गाजलेन्दुखण्डं विष्णोः पादोद्भवं
हरे रेव ॥ पादप्रशोधनार्थे भविष्य
भृङ्गारसंभृतं न्यस्तम् ॥ ४२ ॥
धन्योस्म्यऽनुगृहीतोस्मि गीर्गणेश
हरीश्वरैः ॥ गुरुदेवर्षिपित्राद्यै र्यतः
सिद्धो मनोरथः ॥ ४३ ॥
अज्ञेन यच्च शिशुना परिवीक्ष्य कृत्यं
श्लाघ्यं सतां रचितमीशगुणानुवादैः ॥
सन्तो वदन्तु ननु दोष गुणौ विविच्य
ये दुर्जनाःपरिहसन्तु न मेऽत्र दोषः ॥
शिशुनाप्य नभिज्ञेनाऽपशब्द पदसं
चयम् ॥ क्षमन्तां स्थापितं तच्चेत्क्षमा
सारा हि साधवः ॥ १४५ ॥
विद्यासंवित्स्वरूपा त्रिदशशरणदा पु

स्तकं चाक्षमालां भीहन्त्री भी-
तिदात्री सुजन कुजनयोर्यांभयं धा
रयन्ती ॥ तद्वद्धस्तै र्वरंस्वाभिमतफ
लभुजं कुर्वती भक्तियुक्तं प्रीत्या
सा स्वानुरूपं प्रकटयतु फलं भृत्य
वर्गस्य देवी ॥ १४६ ॥

विष्णो विभोनिज शुभाशुभहेतुमद्धा
संगं वदान्ति कवयो गुणदोषभाजाम् ॥
यस्मात्त्वदाश्रयवती प्रकृतिर्गुणाढ्या
तद्देहि मे गुणवतस्तवपादसंगम् ४७
ज्ञानगृहस्य भवतो जगदण्डभूतमे
कांशतो विविधरूपमभूत्समस्तम् ॥
अव्यक्तरूपमपरांशजलोकधारि ता
र्तीयकं वद सरूपयुगन्त्वमस्मात् ४८
अपशेष मभूज्जगच्च सर्वं

विहितं यद्विधिनापि यस्य नाम्ना ॥
अनुयज्ञमहोत्सवादिकर्म
कृतिनामऽच्युतमेव नित्यमीडे ४८

इति श्रीहरिवंशस्य भविष्याख्यभृङ्गाररूपस्य तृतीयपर्वणः
गङ्गाजलेन्दुखण्डरूपा कथासूत्रप्रकाशिनी अव-
तरणिका समाप्ता शुभंभूयात्
समाप्तमिदंग्रन्थम् ॥

श्रीगणेशायनमः ॥

सर्वेशी सर्वजननी सर्वशक्तिस्वरूपिणी ॥ दिव्यापान्मां सदा पाया द्विश्वरूपविलासिनी ॥ १ ॥

सूर्यचन्द्राग्नि नेत्रा सा जगद्रूपा जगत्प्रसूः ॥ दिव्यापान्मां सदा पाया द्विश्वरूपविलासिनी ॥ २ ॥

किरीटकोट्यर्कनिभमयूखाभिपरिप्लुता ॥ दिव्यापान्मां० ॥ ३ ॥

मत्पुरस्था पद्ममुखी पद्मस्था पद्मलोचना ॥ दिव्यापान्मां० ॥ ४ ॥

ध्याता स्थूलतरा सूक्ष्मा पूर्णा तत्वार्थविज्ञैः ॥ दिव्यापान्मां० ॥ ५ ॥

गुणशक्तिबलोपेता ज्ञानात्मा ज्ञानदा स्वयम् ॥ दिव्यापान्मां० ॥ ६ ॥

सर्वभावमयीचित्रा ममशक्तिवराशि
वा ॥ दिव्यापान्मां० ॥ ७ ॥
कालरूपा प्रकृत्यात्मा विश्वगर्भधरा
शुभा ॥ दिव्यापान्मां० ॥ ८ ॥
वाणी भवेत्सत्यतरा ममेयं भवेन्म-
नो विश्वजनानुकम्पि ॥ शक्तिर्भवे
द्विस्मयकार्यकर्त्री ज्ञानं समस्तोद्धर
णक्षमं स्यात् ॥ ९ ॥
यात्वंब्रह्ममयी शक्ति जंगत्तन्त्रम-
यी च या ॥ उभयोरन्तरं नास्ति स
र्वत्र सुमुखी भव ॥ १० ॥
धूर्जटिनाऽभ्युदितेऽथ भवानी पीठ
वरद्वयतोग्निशिखोत्था ॥ ज्वालभु
जैः परिगृह्य शिवार्चामोमिति सा ब्रु
वती खलु दृष्टा ॥ ११ ॥

दृश्यते केवलं ज्योतिः स्वर्णपीठश्च निर्मलः ॥ निर्माल्यं नास्ति तत्राथ प्रबुद्धोऽहं च तत्क्षणात् ॥ १२ ॥ पीठद्वयार्च्चनरतस्यशिवस्य वक्त्रात्स्वप्ने श्रुता स्तुतिरियं भगवत्प्रसादात् ॥ स्तुत्या नयाननुमहेशपुरोनिषण्णां स्तौमिप्रसन्नहृदयां शिवशक्तिरूपाम् ॥ १३ ॥

इतिश्री शिवकृतं क्षमादेवेन स्वप्नश्रुतं दिव्यापा स्तोत्रं सम्पूर्णम् ॥

श्रीगणेशायनमः ॥ श्रीरुवाच ॥ कर्मणाकेन भगवन्सर्वेषामीश्वरोभवान् ॥ त्रैलोक्यं मोहितं केन त्वनूमाया वशमागतम् ॥ १ ॥ श्रीभगवानुवाच ॥ अवाच्यं गोपनीयं तद्य-

न्मां पृच्छसि सुन्दरि ॥ तव प्रीत्या
प्रवक्ष्यामि ममत्वं वल्लभा यतः ॥ २॥
कर्मणा येन मायापि वशगा मम-
नित्यशः ॥ प्राप्ताच महती सिद्धिः स
र्वे मामाश्रयन्ति च ॥ ३ ॥ मयैतत्प
ठ्यते नित्यं दुर्लभं कवचं प्रिये ॥ वि-
श्वरूपस्य देवस्य सर्वरूपेश्वरस्य हि
॥ ४ ॥ अस्यप्रसादात्सर्वत्र दुर्लभं न
क्वचिन्मम ॥ ममसर्वेश्वरत्वस्य सत्य
मेतद्धि कारणम् ॥ ५ ॥ ऋषिरस्य म
हाविष्णुर्गायत्री छन्दएवच ॥ विश्वा
त्मा देवता मायाबीजं कालश्चकील-
कम् ॥ ६ ॥ शक्तयस्त्रिगुणाः प्रोक्ता
सर्वार्थे विनियोगकः ॥ विश्वरूपंक्षणं
ध्यात्वा ततःपाठं समाचरेत् ॥ ७॥

अथध्यानम् ॥ विश्वाद्यं विश्ववन्द्यंस
कलगुणनिधिं विश्वरूपं विशालं
मायातत्वाद्यमेकैर्विविधगुणयुतैर्भू-
षितं पूर्णबोधम् ॥ विश्वाकारं विरू
पं विगुणविरहितं विश्वगं विश्वगो
पं विश्वेशं विश्वदुःखादिकहरणमहं
श्रीश्वरं देवमीडे ॥ ८ ॥ इति ध्या
त्वा नमस्कृत्य ॥ ॐकारज्ञानसत्या
त्मा ब्रह्मरूपः शिरोऽवतु ॥ सूर्येन्द्व
ग्निप्रकाशात्मा पातुमे नेत्रयुग्मक-
म् ॥ ९ ॥ सुगन्धघ्राणप्राणात्मा ना
सिकां पातुमेसदा ॥ वागुच्चारःपाव-
कात्मा मुखं रक्षतु सर्वदा ॥ १० ॥
दशदिक्श्रुतिशब्दात्मा कर्णौपातुस
दामम ॥ लोकपात्मा करौपातु व-

लपौरुषकर्मकृत् ॥ ११ ॥ क्षुत्रिडाग्नि
समुद्रात्मा कुक्षिंमे पातुविश्ववित् ॥
आनन्दसृष्टिरत्यात्माऽवतूपस्थं प्र-
जापतिः ॥ १२ ॥ विसर्गमृत्त्युमित्रा
त्मा पायुंरक्षतु विश्वहृत् ॥ विष्णवा
स्योगतिशक्त्यात्मा पादौरक्षतुमेस
दा ॥ १३ ॥ वियोगस्पर्श ज्ञानात्मा
त्वचं पातु विशारदः ॥ शब्दब्रह्मा-
त्मको वाचं शुभाशुभ फलात्मकः
॥ १४ ॥ मानसंमे सदापातु शिवःस
ङ्कल्पनामयः ॥ बुद्धिं हिरण्यगर्भा-
त्मा शुभाशुभ विवेचनः ॥ १५ ॥
चित्तं सत्वात्मकः पातुः लोभं पातु
रजोगुणः ॥ मोहाद्रक्षेत्तमोरूपो मा
यामूलोविघातकः ॥ १६ ॥ क्रोधाद्र

क्षेद्रुद्रदेवो कामात्कामःसदाऽवतु ॥ ब्रह्माशिवाऽच्युताःपान्तु जाग्रत्स्वप्न सुषुप्तिषु ॥ १७ ॥ महाकालोनिमेषादि परार्द्धान्ते सदावतु ॥ गुणत्रयं गुणात्त्रक्षेन्ममकार्य्यव्यवस्थया ॥ ॥ १८ ॥ रक्षेद्दशमहाविद्या दशादिक्षु सदा हि माम् ॥ द्रव्यकार्य्येषु सर्वत्र महाभूतानि पञ्चवै ॥ १९ ॥ तत्वानि सर्वतत्वेषु सन्धौ रक्षन्तु मां सदा ॥ वैकुण्ठसत्यस्थानानि सर्वस्थानेषु पान्तु माम् ॥ २० ॥ देवताब्राह्मणा गावो तीर्थानि च महर्षयः ॥ सत्ययज्ञतपोधर्माः साङ्गावेदाश्च सक्रियाः ॥ २१ ॥ ग्रहापाञ्चायनादेवाः सादित्या मातृकागणाः ॥ काली-

सरस्वती लक्ष्मी तेजःश्रीकान्तिकी
र्त्तयः ॥ २२ ॥ उग्ररूपाः सौम्य
रूपास्तथासर्वे चराचराः ॥ प्रसन्नाः
सन्तु सर्वत्र सततं सर्वजातयः॥२३॥
मायेश्वरीमहादेवी सृष्टिस्थित्त्यन्त
कारिणी ॥ सर्वान्तर्यामिनी पातु स
र्वकार्येषु मां सदा ॥ २४ ॥ विश्वजा
तिंविश्वरूपं विश्वकर्माणमच्युतम्
॥ विश्वाधारंविश्वभावं विश्वशक्तिं
महेश्वरम् ॥ २५॥ स्त्रष्टारं विश्वभा-
वानां नाशनंपालनंपरम् ॥ विश्वा-
कारंविश्वमयं पृथग्रूपंसनातनम्२६
चराचराणां विश्वेषामाभिलाषप्रपू
रणम् ॥प्रणमामि महादेवं शरण्यं करु
णामयम् ॥ २७ ॥ भावज्ञं सर्वजाती

नां सर्वज्ञं सुखदं शिवम् ॥ भजेद्ध्याया
मि सततं प्रणमामि पुनः सदा ॥ २८ ॥
सत्यरूपो भवान्यस्मान्मन्त्रमूर्त्तिश्च
सर्वगः ॥ तेन सत्येन माम्पातु सत्या
मम मनोरथाः ॥ २९ ॥ सर्वज्ञः सर्व
गः पातु सदा सर्वत्र सर्वतः ॥ सर्वकामे
सर्वदेहे सर्वकार्येषु वस्तुषु ॥ ३० ॥
इत्येवंकवचं देवि मम सर्वार्थसाधकम्
॥ त्रैलोक्यमोहनंनाम त्रिलोकीव-
श्यकारणम् ॥ ३१ ॥ पाठेऽस्याकिं
फलं वक्ष्ये सकृच्छ्रुत्वापि सिद्ध्यति
॥ पुराकदाचित्क्षीराब्धौ पाठासक्ते
मयिस्थिते ॥ ३२ ॥ हिरण्यकशिपु
त्रस्ता देवा ब्रह्मेशपूर्वकाः ॥ शरणार्थं
मत्समीपमागता ददृशुर्नमाम् ॥ ३३ ॥

ततः कथंचित्सिद्धार्षिभवानीविधि
शंभवः ॥ दद्दशुर्मांशुश्रुवुश्च मत्कृतं
कवचं प्रिये ॥ ३४ ॥ श्रेष्ठाच्छ्रेष्ठतरा
जाता महाशक्तिधराऽमराः ॥ मत्
सान्निध्यादन्यदेवा श्चेन्द्राद्याःश्रेष्ठ
तांययुः ॥ ३५ ॥ क्षिराब्धिवासिनो
येच समुद्रमथनेभवाः ॥ चन्द्रःसु-
धागजोवाजिस्त्वञ्चधन्वन्तारिर्विषः
॥ ३६ ॥ धेनुरप्सरसोऽन्येमत्प्रभा
वाच्छ्रेष्ठतांगताः॥अहोभाग्यंतवरमे
यदेतच्छ्रुतवानासि ॥ ३७ ॥ अस्यप्र
भावात्त्वञ्चैव त्रैलोक्यंमोहायिष्यासि
॥ भाग्योदयोयस्यजातस्तस्यहस्ते
भवेदिदम् ॥ ३८ ॥ यदेतत् कवचं
दिव्यं भक्त्यापठाति नित्यशः ॥ स

र्वार्थसिद्धयस्तस्य करेनित्यं भवन्ति
हि ॥ ३९ ॥ बलाधिकोऽधिकैश्वर्य
भोक्तासर्वस्य वस्तुनः ॥ स्वेच्छाचा
री महाबुद्धिः सर्वेषामाश्रयोभवेत्
॥ ४० ॥ विश्वरूपस्यभक्तस्य ज्ञान
तेजोधिकस्यच ॥ देवाश्चाज्ञांप्रतीक्ष
न्ते दासवत्किमुताऽपरे ॥ ४१ ॥ स
र्वज्ञःसर्वगःश्रेष्ठः सर्वलोकेश्वरस्ततः
॥ सुन्दरःशक्तिमाञ्छश्वत् सर्वलोके
वसेच्चिरम् ॥ ४२ ॥ यत्रकुत्रापिजात
स्य सन्तानस्तस्यजायते ॥ भोगीसु
खीचिरस्थायी बलपौरुषकीर्त्तिमान्
॥ ४३ ॥ सङ्कल्पास्तस्यासिद्ध्यन्ति
सदा सर्वत्रसर्वतः ॥ तस्यस्वेच्छाऽनु-
सारेण सिद्धःसर्वत्रपूज्यते ॥ ४४ ॥

नवग्रहाश्चतुष्यान्ति योगिन्यश्चैव
पीडका: ॥ भूता:प्रेता: पिशाचाश्च
डाकिन्योबालकग्रहा: ॥ ४५ ॥ श
त्रवश्चवशंयान्तिजेतारन्तंनमान्तिच
॥ सौम्या;क्रूरास्तथैवान्ये तस्याज्ञा
वशवर्त्तिन: ॥ ४६ ॥ भवन्तिवशगा
स्तस्य तेणिमाद्यष्टसिद्धय: ॥ सर्वज्ञ:
सर्वविजयीसर्वभोक्ताभवेद्ध्रुवम् ४७
वक्तुं विश्वेशकवचमाहात्म्यंनैवश
क्यते ॥ तद्भक्तस्यममैवत्वं पश्यैश्व
र्यमनन्तकम् ॥ ४८ ॥ सत्यप्रातिष्ठि
तालोका:सूर्य्य:सत्येनगच्छति ॥ स
त्याद्वायु: प्रवहातिसत्येसर्वंप्रातिष्ठितम्
॥ ४९ ॥ सत्यस्याविश्वरूपस्य सेव-
क:सत्यवान्भवेत्॥ सत्येन जयतेसर्वं

लोकं सत्यं ब्रवीमि ते ॥ ५० ॥
विश्वरूपंहित्रैलोक्यमोहनेन भज
न्तिये ॥ तान्भजान्तिसदाभक्त्या
लोकाः सूर्य्यसमान्प्रिये ॥ ५१ ॥
ध्यायते विश्वरूपंयो नित्यंचन्द्रस-
मोभवेत् ॥ तस्यलोकाः प्रहस्यन्
ति चन्द्रादिवनसंशयः ॥ ५२ ॥ श्री
विश्वरूपंयेभक्त्या प्रणमन्ति दिवा
निशम्॥तान्नमस्यन्ति सर्वेंपिलोकाः
सत्यं ममप्रिये॥५३॥नाख्येयंहि-
कचिद्भद्रे गोपनीयं सदात्वया ॥ म
म सर्वस्वमेताद्धि विद्धित्वं बुद्धिपूर्वक
म् ॥ ५४ ॥

इतिश्री श्रीतन्त्रे विष्णुलक्ष्मी सम्वादे योगिकुला
न्तर्गतं त्रैलोक्यमोहनं नामश्रीविश्वरूप
कवचंसंपूर्णंशुभम् श्रीरस्तुसताम्

उपमन्युरुवाच ॥

जयशङ्कर पार्वतीपते मृडशंभो शशिखण्ड मण्डन ॥
मदनाऽन्तक भक्तवत्सल प्रियकैलाश दयासुधाम्बुध ॥ १ ॥
सदुपायकथास्वपण्डितो हृदये दुःखशरेण खण्डितः ॥
शशिखण्डशिखण्डमण्डनं शरणं यामि शरण्यमीश्वरम् ॥ २ ॥
महतःपरितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे ॥
दिननाथ इवस्वतेजसा हृदयव्योम्नि मनागुदेहि नः ॥ ३ ॥
न वयन्तव चर्मचक्षुषः पदवीमप्यभिवीक्षितु क्षमाः ॥ ४ ॥
कृपयाऽभयदेन चक्षुषा सकलेनेश विलोकयाशु माम् ॥
त्वदनुस्मृतिरेव पावनी स्तुतियुक्ता किमुवक्तुमीशसाः ॥
मधुरं हि पयःस्वभावतो ननुकीदृक् सितशर्करान्वितम् ॥ ५ ॥
सविषोप्यमृतायते भवान् शवमुण्डाभरणोऽपिपावनः ॥
भवएव भवान्तकः सतां समदृष्टि र्विषमेक्षणोऽपि सन् ॥ ६ ॥
अपि शूलधरो निरामयो दृढवैराग्यरतोपि रागवान् ॥
अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥ ७ ॥
वितरस्यभिवाञ्छितं दृशा परिदृष्टः किल कल्पपादपः ॥
हृदये स्मृतएव धीमते नमतेऽभीष्टफलप्रदोभवान् ॥ ८ ॥
सहसैव भुजङ्गपाशवान्विनिगृह्णातिन यावदन्तकः ॥
अभयंकुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥ ९ ॥
सविषैरिव भीमपन्नगै र्विषयैरेभिरलं परिक्षतम् ॥
अमृतैरिव संभ्रमेणमा मभिषिञ्चाशु दयावलोकनैः ॥ १० ॥
मुनयोबहवोऽद्य धन्यतां गमिताः स्वाभिमतार्थदर्शिनः ॥
करुणाकर येनतेन मामवसन्नं ननु पश्य चक्षुषा ॥ ११ ॥
प्रणमाम्यथ यामि चापरं शरणं कं कृपणाभयप्रदम् ॥

विरहीव विभो प्रियामयं परिपश्यामि भवन्मयंजगत् ॥ १२ ॥
बहुधो भवतानुकम्पिताः किमितशिान न माऽनुकम्पसे ॥
दधताकिमु मन्दराचलं परमाणुः कमठेन दुर्धरः ॥ १३ ॥
विलुठाम्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मिवा ॥
किमुरोदिमि रारटीमि किं कृपणं मामुपदृश्यतां प्रभो ॥ १४ ॥
अशुचिं यदिमाऽनुमन्यसे किमिदं मूर्ध्निकपालदाम ते ॥
अथ दुष्टमसाधुसङ्गतं विषलक्ष्मासि ननिर्किं द्विजिह्वभृत् ॥ १५ ॥
क्वदृशं विदधामि किंकरोम्यथ तिष्ठामि कथंभयाकुलः ॥
क्वनुतिष्ठसि रक्षरक्ष मामपि शंभो शरणागतोस्मि ते ॥ १६ ॥
शिव सर्वग शर्व सर्वदा नमतो देवदयां कुरुष्वमे ॥
नम ईश्वर नाथ दिक्पते पुनरेवेश नमो नमोऽस्तुते ॥ १७ ॥
शरणं तरुणेन्दुशेखरः शरणंमे गिरिराजकन्यका ॥
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥ १८ ॥
शङ्करस्य चरितं कथामृतं चन्द्रशेखर गुणानुकीर्तनम् ॥
नीलकण्ठ तव पादसेवनं संभवन्तु ममजन्मजन्मसु ॥ १९ ॥
उपमन्यु कृतं शिवस्तवं पठतः शंभु समीपवर्त्तिनः ॥
अपि वाञ्छितभाग्यसंपदः परमायुश्च ददाति शङ्करः ॥ २० ॥
उपमन्यु कृतं शिवस्तवं पठते योहि शिवस्य सन्निधौ ॥
शिवलोकमवाप्य संचरन् सह तेनैव शिवेन मोदते ॥ २१ ॥

इतिश्री उपमन्यु कृतं शिवस्तोत्रं संपूर्णम् शुभम् ॥

अशुद्ध	शुद्ध	पृष्ठ	पङ्क्तिः	अशुद्ध	शुद्ध	पृष्ठ	पङ्क्तिः
साम्वं	साम्बं	१	१	पुरस्थाँतपः	पुरस्थाँस्तपः	४०	२
केशवम्	केशवं	१	२	वध	वध	४१	२
मंत्रित्वयुगांक	मन्त्रित्वयुगाङ्क	३	११				
भमिपेन्द्र;	भूमिपेन्द्रः	३	१५	स्त्रीभिम	स्त्रीभिर्म	४१	४
वलतो	वलता	४	१	मिच्छताः	मिच्छता	४१	१४
वभूवगंभीर	बभूवगम्भीर	४	४	शक्राज्ञय	शक्राज्ञया	४३	८
मतिमताम्बरा	मतिमतांवरा	४	८	कशतमे	कृशततमे	४४	१०
हारि	हरि	५	२	वरं	वरम्	४६	६
कावि	कवि	५	७	कान्तत्व	कान्तत्वं	४७	६
विवुधा	विबुधा	६	९	वा-		४७	१२
वहुश;	बहुशः	६	१०	वद्धः	बद्धः	४८	१
व्रत	व्रत	६	८	नारदातत्	नारदात्तत्	४८	५
निःसुताः	निःसृता	७	१२	वभूव	बभूव	४८	१३
वृक्षस्य	वृक्षस्य	८	६	वोधितो	बोधितो	५२	६
शार्ङ्गिणो	शार्ङ्गिणो	८	७	षाट्विंशे	षाड्विंशे	५६	१०
गोरुपा	गोरूपा	९	११	स्तंभितो	स्तम्भितो	६९	६
बध	वध	१०	१५	चत्वरिंशे	चत्वारिंशे	६९	८
त्रिशंकु	त्रिशङ्कु	११	४	ब्रम्ह	ब्रह्म	६४	१६
बधो	वधो	१२	१२	घृणीः	घृणी	६८	४
पूरुरवा	पुरूरवा	१३	१६	अंत	अन्त	६९	१४
पूरुरव;	पुरूरवः	१४	१२	पंच	पञ्च	७०	१४
वृषान्तः	वृषान्तः	१५	१	पंच	पञ्च	७२	१४
षड्	षट्	१६	१६	मासतुदूतं	मासतुर्दूतं	७४	१२
क्रौष्टेर्वै	क्रोष्टोर्वै	१६	१६	पंच	पञ्च	७४	१४
बहुविध;	बहुविधः	१६	६	पंच	पञ्च	७६	१४
द्धि	द्वि	१७	३	वाणे	बाणे	७८	९
ऽम्वष्ठ	ऽम्बष्ठ	२८	१	बिद्या	विद्या	७९	१६
क्रूद्धं	क्रुद्धं	२८	२	ग्रहा	ग्रहाः	८८	१४
वलस्य	बलस्य	३१	४	क्षिराब्धि	क्षीराब्धि	९१	६
वलस्य	बलस्य	३१	१	चर्मे	चर्म	९५	८

दलौ नं० ५०४०

अशुद्ध	शुद्ध	पृष्ठ	पङ्क्तिः
मशिसाः	मीशसा	९९	१०
चित्रभिदं	चित्रमिदं	९९	१५
भीभ	भीष	९९	२०
अभृतै	अमृतै	९५	२१
संभ्रभेण	संभ्रमेण	९५	२१
नान्यद्दुपैमि	नान्यमुपैमि	९६	१३
भम	मम	९६	१५
उपभन्यु	उपमन्यु	९६	१६
सभीप	समीप	९६	१६
जिह्वमृत्	जिह्वभृव	९६	७

अशुद्धाङ्क	शुद्धाङ्क	पृष्ठ	पङ्क्तिः	अशुद्धाङ्क	शुद्धाङ्क	पृष्ठ	पङ्क्तिः
३५	३६	१६	२	६७	६८	६५	७
८६	८३	१९	२१	९७	७५	६९	१३
३३	६३	३२	१६	१००	१०२	७१	४
६२	६१	३५	९	३२।२६	२२।१६	७५	४
७४	७५	३८	६	३३।२७	२३।१७	७५	७
१०६	१०७	४९	५	३४।२८	२४।१८	७५	१०
२०	२९	४६	३	२४।२९	२५।१९	७६	१३
११३	१२३	४८	८	४८	४९	८१	३
४	४१	४८	११	७३	७२	६६	७

[illegible]

[illegible]